forest. The kingdom is of little value in his estimation, and so he never troubles himself about it, even when his enemy threatens to snatch it away from him. As for himself he has no desire of retaining it, and would have already given it over to somebody, had it not been for the displeasure of his father. Notwithstanding this disregard for the kingdom, he is, as long as he retains it, never neglectful of his duties. But waiting upon his parents affords him greater pleasure than receiving homages from tributary princes. He very severely condemns the period of youth as giving rise to passions, and as being perishable and inconsiderate, yet by reason of the strength of his filial affection he likes it, provided that it is spent in attendance upon his parents. But the most important feature of his character is his intense love of benevolence. In his palace-garden there was a wishing tree which had come down to him from his ancestors. Seeing that his predecessors asked it for wealth only and for no other fruit worthy of it, and that they thus made themselves as well as the tree equally contemptible, he gives it over to the poor. He is always averse to causing injury to anybody. He is more willing to sacrifice his own body than to give affliction to any one, even his enemy. Although, while living in the forest, every rural object, supplying the requisites of life, conduces to his satisfaction, yet he is ever restless as he cannot find an opportunity of doing good to others. The magnanimity of his heart and his contempt for those that cannot come up to his standard of benevolence are clearly seen when he expresses his wonder that Vasuki would not dare to volunteer himself for the protection of his Nâgas from the claws of Garuda. His natural impulse of endangering even his body for the sake of others seems to have been strengthened by the low opinion that he holds regarding it. It is, in his opinion, an abode of all impurities, and a mere mass of fat, bones, flesh, and blood, covered with a skin. And he regrets to find that there are persons in the world that are tempted to commit sin even for the sake of such a body. As for his own, he thinks it to be best utilized if he offers it to Garuda to save the life of S'ankhachûda. His extreme desire to benefit others is also seen in his last request that he may, by the efficacy of the merit of his benevolent action, obtain a body even in succeeding births in order to be able to do good to others thereby. He is also firm in his resolution and betrays no sign of pain while Garuda is preying upon his body, but on the contrary requests him

Digitized by Google

to feast on, when he stops for a while fearing that he is not a Nâga. By reason of this and other qualities in Jîmûtavâhana Garuda is quite justified when he says, referring to his death, that he has killed the Bodhisattva himself. The piece of advice that he gives to Garuda may be taken to be a fair model of the moral principles that are always uppermost in his mind and are seen exemplified by his conduct. These and several other minor qualities of Jîmûtavâhana are well summed up by his father in V. 123.

The hero of the play is brave and noble-minded (धीरोदात्त). But some object to his being brave on the ground that bravery consists in a supremacy over all, which again includes a desire for conquest, and that the verses in I. 6 and 9 clearly prove that there is a total absence of any such desire in his mind. Thus the hero being mostly of a quiet temper and exceedingly compassionate, the predominant sentiment in him, they say, must be quietistic(शान्त). And having thus proved the predominance of the quietistic element they go further and point out as a fault the love scene between the hero and the heroine, inasmuch as it is quite inconsistent with the principal sentiment. But the objection is not a sound one. For the desire of conquest (विजिगीषुता) cannot be said to be absent from the hero's mind. He who can surpass others in bravery, gifts, or compassion may fairly be said to have such a desire. The verse in I. 9., no doubt, points to the hero's aversion to the worldly pleasures, but noble minded men are always so. Besides, the love scene, referred to above, far from being a fault, serves to afford an additional indication that the chief sentiment in the hero is not quietism.[10]

The character of S'ankhachûda is also very noble. Although his virtues do not rank so high as those of Jîmûtavâhana, they have an excellence of their own that excites our sympathy and admiration. S'ankhachûda is not so benevolent as Jîmûtavâhana, but is unwilling that the benevolence of the latter should come in his way and stigmatise his name. The scope of the generosity of Jîmûtavâhana is unlimited. He is ready to endanger his life for the sake of any one in distress. The affections of S'ankhachûda are confined to himself and to those that are related to him; and yet they are of a noble character and never stained with any trait of selfishness. Jîmûtavâhana in the ardour of his philanthropy

[10] See Das'arûpa, pp. 64—65, Dr. Hall's Ed.

Digitized by Google

forgets his old and helpless parents and even his newly wedded bride; and one is exceedingly struck with wonder to see that he who was once so filial and so love-sick should not utter a single kind expression with regard to his relatives, but should, with a coldness almost verging on heartlessness, say that the rock of execution gives him greater pleasure than the lap of his mother in his infancy or the embraces of his wife in his youth. And in this respect he justly deserves the reproach of his father in V. 73. But S'ankhachûda tries his utmost to console his mother. He tells her that it is foolish to lament the death of a being who is by nature mortal. His last desire is that in each of his succeeding births he may have the same mother; and he requests Jîmûtavâhana that he should take care to see that his mother does not abandon her life through grief on account of her son's death. S'ankhachûda is loyal, and in obedience to the behest of his king, Vasuki, his private affections are immediately superseded by his sense of duty to the public welfare. He has a pride in the name of his family and will never see its glory sullied on account of any misdeed of his. And seeing on his return from Gokarna that Garuda has taken away Jîmûtavâhana, he feels extremely sorry, and rather justly blames the philanthropic hero for having deceived him in that way. He detests himself as being saved at the sacrifice of another's life. And after a time when he finds out Garuda, he boldly offers himself as his proper prey requesting him to let loose the Vidyâdhara. We may well close this sketch of the character of S'ankhachûda with a quotation from the Kathâsaritsâgara which runs thus :—

बहुजन्मसिद्धमेताश्चित्रं जीमूतवाहनस्य कियत् ।
श्लाघ्यः स शङ्खचूडो मरणोत्तीर्णोऽपि यो रिपवे ॥
अन्यत्र (अन्यं ?) दत्तात्मानं प्राप्य सुदूरं गताय ताक्ष्यीय ।
पश्चाद्धावन्गत्वा स्वं देहमुपानयत्प्रसभम् ॥

The scene of the play is laid on the Malaya mountain, now known as the Malabar Hills. The range of the Malaya Parvat, according to the modern geography, is separated from that of the Sahyâdri to the north of it by the Canara hills, which run along the coast from the mouth of the Kalinadi near Karwar down to the Shiravati or Honavar river. The play in IV. 80 makes mention of Gokarna, one of the twelve *Jyotilingas*, whose temple is situated in a place of the same name (Gokarna), which lies five miles southeast of the Ganga-

Digitized by Google

vali river, close to the sandy shore, in the Canara District, and which is, according to Brahmin Geographers, regarded to be the southernmost point of the Konkan. The distance between Gokarna and the northernmost point of the Malaya ranges is nearly thirty-two miles. Thus the exact positions of the Malaya and Gokarna being determined, it is hard to understand how S'ankhachûda could go to salute the god S'va in Gokarna and come back within the lapse of at the most twenty minutes. Only two explanations seem possible in this case. The poet must have introduced Gokarna not attaching much importance to the impossibility of traversing a distance of about sixty-four miles within a few minutes. But it is very likely that the author of the play, being an inhabitant of North India, like the author of the Bṛihatkathâ from which the plot of the play is borrowed, was not acquainted with the exact situation of a place in the south. Or the ancient notions about the extent of the Malaya Parvat might have been different from those of the present day. What are known at present as the Canara hills might also have been considered as a part of the Malaya ranges in ancient times.

In writing the introduction and the notes the following books were consulted :—Buddhism by Rhys Davids ; Buddhist Records of the Western World by S. Beal ; Dr. Hall's Preface to Vâsavadattâ ; Buddhist Birth Stories by Rhys Davids ; Monier Williams' Buddhism ; Lalita-Vistara (Rajendralala Mitra's Ed.) ; English Translation of Sâhitya-Darpana by Dr. Ballantyne and Pramadâdâsa Mitra ; Mr. Boyd's translation of the Nâgânanda with Professor Cowell's preface to it ; Bombay Gazetteer, Canara District.

Lastly we take an opportunity of expressing our sense of gratitude towards Dr. R. G. Bhandarkar for his many invaluable suggestions. We are also thankful to all those who have placed us under obligations by their kind assistance while we were preparing the book.

Digitized by Google

Digitized by Google

॥ नागानन्दम् ॥

॥ प्रथमोऽङ्कः ॥

॥ नान्दी ॥

1 ध्यानव्याजमुपेत्य चिन्तयसि कामुन्मील्य चक्षुः क्षणं
पश्यानङ्गशरातुरं जनमिमं त्रातापि नो रक्षसि ।
मिथ्याकारुणिकोऽसि निर्घृणतरस्त्वत्तः कुतोऽन्यः पुमान्
सेर्ष्यं मारवधूभिरित्यभिहितो बुद्धो जिनः पातु वः ॥ १ ॥

अपि च ।

कामेनाकृष्य चापं हतपटुपटहावल्गिभिर्मारवीरै-
र्भ्रूभङ्गोत्कम्पजृम्भास्मितललितदृशा दिव्यनारीजनेन ।
सिद्धैः प्रह्वोत्तमाङ्गैः पुलकितवपुषा विस्मयाद्वासवेन
ध्यायन्यो योगपीठादचलित इति वः पातु दृष्टो मुनीन्द्रः ॥२॥

नान्द्यन्ते

2 सूत्रधारः । अलमतिविस्तरेण । अद्याहमिन्द्रोत्सवे सबहुमान-
माकार्य नानादिग्देशागतेन राज्ञः श्रीहर्षदेवस्य पादप-
ोपजीविना राजसमूहेनोक्तः । यथास्मत्स्वामिना श्रीह-
र्षदेवेनापूर्ववस्तुरचनालंकृतं विद्याधरजातके प्रतिनिबद्धं

---

1. B. om. नागानन्दम् । प्रथमोङ्कः । नान्दी । B_3 श्रीकृष्णाय नमः & B_3 श्रीशं वन्दे before ध्यानम्. C. स कोऽन्यः for कुतोऽन्यः. B_3 सेर्षे for सेर्ष्यं. B_1 वार for मार. B_1 B_3 om. अपि च. B. °पटहा (B_1 °पटहं) वल्गुभिः. B. उत्क्षेप for उत्कम्प. C. चलित for ललित; बोधिरवाप्तो न चलितः for यो योगपीठादचलितः.

2. B. om. अलमतिविस्तरेण. C. आहूय for आकार्य; राजश्री° for राज्ञः श्री.° B. add राजर्षेः after °देवस्य. C. यत्तत्; B. यथायत् for यथा which we read with Ratnâvali and Priyadars'ikâ, C. °चक्रवर्तिप्रतिबद्धम्; B_3 °जातकप्रभृतिनिबद्धम् for °जा—द्धम्.

Digitized by Google

नागानन्दं नाम नाटकं कृतमित्यस्माभिः श्रोत्रपरम्परया श्रुतं न तु प्रयोगतो दृष्टम् । तत्तस्यैव राज्ञः सकलजनहृदयाल्हादिनो बहुमानादस्मासु चानुग्रहबुद्ध्या यथावत्प्रयोगेण त्वया नाटयितव्यमिति ।

तद्यावदिदानीं नेपथ्यरचनां कृत्वा यथाभिलषितं संपादयामि । परिक्रम्यावलोक्य च । आवर्जितानि च सकलसामाजिकानां मनांसीति मे निश्चयः। यतः

श्रीहर्षो निपुणः कविः परिषदप्येषा गुणग्राहिणी
लोके हारि च बोधिसत्त्वचरितं नाट्ये च दक्षा वयम् ।
वस्त्वैकैकमपीह वाञ्छितफलप्राप्तेः पदं किं पुन-
मर्द्धाग्योपचयादयं समुदितः सर्वो गुणानां गणः ॥ ३ ॥

तद्यावद्गृहं गृहं गत्वा गृहिणीमाहूय संगीतकमनुतिष्ठामि । परिक्रम्य नेपथ्याभिमुखमवलोक्य च । इदमस्मद्गृहम् । यावत्प्रविशामि । प्रविश्य । आर्ये इतस्तावत् ।

प्रविश्य

3 नटी । सास्रम् । अज्ज इयम्हि मन्दभग्गा । आणवेदु अज्जउत्तो को णिओओ अणुचिट्ठीअदुत्ति ।

4 सूत्र० । विलोक्य । आर्ये नागानन्दे नाटयितव्ये किमिदमकारणमेव रुद्यते ।

---

3 आर्य इयमस्मि मन्दभाग्या । आज्ञापयत्वार्यपुत्रः को नियोगोऽनुष्ठीयतामिति ।

B. नागानन्दनाम नाटकम्. C. om., इति after कृतम्. All read च for तु which we with R. & P. B. om. सकलजनहृदयाल्हादिनः. B_1 B_2 वा for च. B_3 वा after बुद्ध्या. B. यथा for यथावत्. B_3 om. तद्यावत्—अवलोक्य च. B. add एव after आवर्जितानि. B_1 B_2 add मया after च. B. om. सकल; read लोकानन्दि for लोके हारि. C. सिद्धराज for बोधिसत्त्व. B. om. अहं गृहं गत्वा. C. om. च after अवलोक्य. B. om. इदम्—प्रविश्य; read ततः प्रविशति for प्रविश्य.

3. B_3 अज्जउत्त for अज्ज. B. om. मन्दभग्गा.

4. C. नटीमवलोक्य for विलोक्य. B_1 B_2 नागानन्दनाटके for नागानन्दे.

Digitized by Google

5 नटी । अज्ज कहं ण रोदिस्सं । जदो दाव तादो अज्जाए सह थविरभावजादणिव्वेदो कुडुम्बभारुव्वहणजोग्गो दाणिं तुमंत्ति आरोविअ हिअए तवोवणं गदो ।

6 सूत्र० । सनिर्वेदम् । अये कथं मां परित्यज्य तपोवनं यातौ पितरौ । तत्किमिदानीं युज्यते कर्तुम् । विचिन्त्य । अथवा कथमहं गुरुचरणपरिचर्यासुखं परित्यज्य गृहे तिष्ठामि ।

पित्रोर्विधातुं शुश्रूषां त्यक्त्वैश्वर्यं क्रमागतम् ।
वनं यास्यहमप्येष यथा जीमूतवाहन ॥ ४ ॥

इति निष्क्रान्तौ ।

प्रस्तावना ।

ततः प्रविशति नायको विदूषकश्च ।

7 नाय० । सनिर्वेदम् । सखे आत्रेय

रागस्यास्पदमित्यवैमि न हि मे ध्वंसीति न प्रत्ययः
कृत्याकृत्यविचारणासु विमुखं को वा न वेत्ति क्षितौ ।
एवं निन्द्यमपीदमिन्द्रियवशं प्रीत्यै भवेद्यौवनं
भक्त्या याति यदीत्थमेव पितरौ शुश्रूषमाणस्य मे ॥ ५ ॥

---

5 आर्य कथं न रोदिष्यामि । यतस्तावत्तात आर्यया सह स्थविरभावजातनिर्वेदः कुटुम्बभारोद्वहनयोग्य इदानीं त्वमित्यारोप्य हृदये तपोवनं गतः ।

---

5. C. जदो for जदो. B_1 om. दाव. B_1 B_2 अज्जाए for अज्जाए and ठेर; B_3 ठविर for थविर. C. °भाव जाणिअ अदूरजादणिव्वेदो for °भाव —दो. B_3 इदाणिं for दाणिं. C. हिअए चित्तक्खिअ for आरोविअ हिअए. B_3 तए for हिअए. B. add त्ति after गदो.

6. B. om. सनिर्वेदम् ; read कथं मामपि परित्यज्य वनं प्रयातौ for अये —पितरौ. B_3 adds पितरौ after प्रयातौ. B. om. तत्. C. om. कर्तुम्. B. have विचिन्त्य before तत्किम् and गुरुशुश्रूषासुखरसम् for गुरुचरणपरिचर्यासुखम्. C. add कुतः after तिष्ठामि and read अद्यैव for भवेष. B. add तवेहि मन्दिरमेव गच्छावः after verse 4 and read जीमूतवाहनः for नायकः.

7. B. om. सनिर्वेदम्. C. वयस्य for सखे. B. रोगस्य for रागस्य. C. ईप्सितफलप्राप्त्यै for इन्द्रियवशं प्रीत्यै.

Digitized by Google

8 विदू० । सरोषम् । भो वअस्स णं णिव्विण्णो एव्व तुमं एत्तिअं कालं एदाणं जीवन्तमुआणं कदे इमं ईदिसं वणवासदुक्खं अणुहवन्तो । ता पसीद दाणिंपि दाव गुरुचलणसुस्सूसानिब्बन्धादो निअत्तिअ इच्छाभोअरमणीअं रज्जसुहं अणुहवीअदु ।

9 नाय० । वयस्य न सम्यगभिहितं त्वया । कुतः

तिष्ठन् भाति पितुः पुरो भुवि यथा सिंहासने किं तथा
यत्संवाहयतः सुखं तु चरणौ तातस्य किं राजके ।
किं भुक्ते भुवनत्रये धृतिरसौ भुक्तोज्झिते या गुरो-
रायासः खलु राज्यमुज्झितगुरोस्तत्रास्ति काश्चिद्गुणः ॥ ६ ॥

10 विदू० । आत्मगतम् । अहो एदस्स गुरुचलणसुस्सूसाणुराओ । विचिन्त्य । भोदु ता एदंपि दाव भणिस्सं । प्रकाशम् । भो वअस्स ण क्खु अहं रज्जसुहं एव्व केवलं उद्दिसिअ एव्वं भणामि । अण्णंपि दाव करणीअं अत्थि एव्व ।

---

8 भो वयस्य ननु निर्विण्ण एव त्वमेतावन्तं कालमेतयोर्जीवन्मृतयोः कृते इममीदृशं वनवासदुःखमनुभवन् । तत्प्रसीद इदानीमपि तावद्गुरुचरणशुश्रूषानिर्बन्धान्निवृत्येच्छाभोगरमणीयं राज्यसुखमनुभूयताम् ।

10 अहो एतस्य गुरुचरणशुश्रूषानुरागः । भवतु तदेतदपि तावद्भणिष्यामि । भो वयस्य न खल्वहं राज्यसुखमेव केवलमुद्दिश्यैवं भणामि । अन्यदपि तावत्करणीयमस्त्येव ।

---

8. B_3 णविण्णो for णं णिव्विण्णो. B_1 B_2 एसो for एव्व. B_3 एत्तिअकालं for एत्तिअं कालं. B. जीविदाणुगदाणं वन्धुकाणं. (B_3 वन्धुकाणं) for जीवन्तमुआणं. B_1 अनुभवसि for अणुहवन्तो. C. °परिभोग for our °भोअ.

9. B. सखे for वयस्य; om. त्वया & have हि for तु. B_3 राजकं. B_1 वा for या. B. मे न for तत्र.

10. C. से गुरुअण for एदस्स गुरुचलण. B. om. भोदु ता & read इदं for एदं. C. सोक्खं for सुहं. B. om. एव्वं. C. दे for दाव.

11. B. om. यत्. C. om. तावत् &

Digitized by Google

11 नाय० । सस्मितम् । वयस्य ननु कृतमेव यत्करणीयम् । पश्य तावत् ।

न्याय्ये वर्त्मनि योजिताः प्रकृतयः सन्तः सुसंस्थापिता
नीतो बन्धुजनस्तथात्मसमतां राज्ये च रक्षा कृता ।
दत्तो दत्तमनोरथाधिकफलः कल्पद्रुमोऽप्यर्थिने
किं कर्तव्यमतःपरं वद सखे यत्ते स्थितं चेतसि ॥ ७ ॥

12 विदू० । भो वअस्स अच्चन्तसाहसिओ मदङ्गहदओ देपडिवक्खो । तस्सिं च समासण्णट्ठिदे पहाणामच्चसमधिट्ठिदंपि तुए विणा रज्जं सुट्ठिदंत्ति ण मे पडिहादि ।

13 नाय० । किं मतङ्गो राज्यं हरिष्यतीति शङ्कसे ।

14 विदू० । अध इं ।

15 नाय० । यद्येवं ततः किम् । ननु स्वशरीरतः प्रभृति परार्थमेव सर्वं मया परिकल्प्यते । यच्च स्वयं न दीयते तत्तातानुरोधात् । तत्किमनेन राज्यवस्तुना चिन्तितेन । वरं तातादैवानुष्ठिता । आज्ञप्तश्चास्मि तातेन । यथा वत्स जीमूतवाहन बहुदिवसपरिभोगदूरीकृतसामित्कुशकुसुममुपभुक्तमू-

---

12 भो वयस्य अत्यन्तसाहसिको मतङ्गहतकस्ते प्रतिपक्षः । तस्मिंश्च समासन्नस्थिते प्रधानामात्यसमधिष्ठितमपि त्वया विना राज्यं सुस्थितमिति न मे प्रतिभाति ।

14 अथ किम् ।

---

read सुखं° for सुसं°. B. पि for च C. कथय वा for वद सखे.

12. B_3 समासुणिहदे पहाणायत्तं समधिअपि for समासण्णिट्ठिद &c. B_1 समाट्ठिदं for समधिट्ठिदं. C. सुस्थिरं for सुट्ठिदं & place ण after पि.

13. C. धिङ् मूर्ख for किम्. B. read मतङ्गहतको राज्यं गृहिष्यतीत्याशङ्कसे.

15. C. तस्किं न स्यात् for ततः किम् ; स्वशरीरात् for स्वशरीरतः; परिपाल्यते for परिकल्प्यते as also B_3 ; अवस्तुना for राज्यवस्तुना. B_3 अनुज्ञा for आज्ञा. C. °परिभोगेण स्वीकृत°

Digitized by Google

लफलकन्दनीवारमात्रमिदं स्थानं वर्तते । तदितो मलयपर्वतं गत्वा तस्मिन्निवासयोग्यं किञ्चिदाश्रमपदं निरूपयेति । तदेहि मलयपर्वतमेव गच्छावः ।

16 विदू० । जं भवं आणवेदि ।

इत्युभौ परिक्रामतः ।

17 विदू० । अग्रतोऽवलोक्य । भो वअस्स एसो क्खु सरसघणचन्दणवणुस्सङ्गपरिमिलणलग्गबहलपरिमलो विसमतडोपहदजज्जरिदणिज्झरुच्छलिदासिसिरसीअरासारवाही पढमसङ्गमुक्कण्ठिअपिआकण्ठग्गहो विअ मग्गपरिस्समं अवणअन्तो रोमञ्चेदि पिअवअस्सं मलअमारुओ ।

18 नाय० । निरूप्य सविस्मयम् । अये प्राप्ता एव वयं मलयपर्वतम् । समन्तादवलोक्य । अहो रामणीयकमस्य । तथा हि

माद्यत्कुञ्जरगण्डभित्तिकषणैर्भग्नस्रवच्चन्दनः
क्रन्दत्कन्दरगह्वरो जलनिधेरास्फालितो वीचिभिः ।
पादालक्तकरक्तमौक्तिकशिलः सिद्धाङ्गनानां गतैर्-
दृष्टोऽयं मलयाचलः किमपि मे चेतः करोत्युत्सुकम् ॥ ८ ॥

---

16 यद्भवानाज्ञापयति ।

17 भो वयस्य एष खलु सरसघनचन्दनवनोत्सङ्गपरिमिलनलग्नबहलपरिमलो विषमतटोपहतजर्जरितनिर्झरोच्छलितशिशिरशीकरासारवाही प्रथमसङ्गमोत्कण्ठितप्रियाकण्ठग्रह इव मार्गपरिश्रममपनयन् रोमाञ्चयति प्रियवयस्यं मलयमारुतः ।

---

for परिभोगदूरीकृत°. B_3 अस्मिन् for तस्मिन्. C. read किञ्चित् after गत्वा. B. निरूपयस्व for निरूपय and ततो यावत् for ततेहि.

16. B. देवो for भवं. C. add एदु भवं after आणवेदि.

17. C. add पेक्ख पेक्ख after वअस्स. B_3 बहुल for बहल. C. विमल तडनिवेडणजज्जरिज्जन्त for विसमतडोपहदजज्जरिद. B_3 विसमत्तऊपहणज्जज्जरिज्जन्त.

18. B. विलोकय । अहो (B_3 adds कथम्) वयं प्राप्ता एव मलयपर्वतम् । सर्वतो निरूप्य । अहो रमणीयतास्य मलयाचलस्य. C. दिग्गज for कुञ्जर. B_1 B_2 मौलिक for मौक्तिक; सेव्यः for दृष्टः. B_3 उत्सुकम् for उत्सुकम्. B_3

Digitized by Google

तदेनमवरुह्य निवासयोग्यं किञ्चिदाश्रमपदं निरूपयावः ।

19 विदू०। एवं करेम्ह । अग्रतः स्थित्वा । एदु भवं ।

आरोहणं नाटयतः ।

20 नाय० । दक्षिणाक्षिस्पन्दनं सूचयित्वा विमृश्य । सखे
दक्षिणं स्पन्दते चक्षुः फलाकाङ्क्षा नमे क्वचित् ।
न च मिथ्या मुनिक्वचः कथयिष्यति किं न्विदम् ॥ ९ ॥

21 विदू० । भो वअस्स आसण्णं ते पिअं णिवेदेदि ।

22 नाय० । एवं नाम यथाह भवान् ।

23 विदू० । विलोक्य । भो वअस्स पेक्ख पेक्ख । एदं क्खु सावि-
सेसघणसिणिद्धपाअवविसोहिअं सुरहिहविगन्धगब्भिदुद्दा-
मधूमणिग्गमं अणुविग्गसुहनिसण्णसावअगणं तवोवणं
विअ लक्खीअदि ।

24 नाय० । सम्यगुपलक्षितम् । तपोवनमेवैतत् । तथा हि
वासोर्थं दयये व नातिपृथवः कृत्तास्तरूणां त्वचो
भग्नानेकजरत्कमण्डलु नभःस्वच्छं पयो नैर्झरम् ।

---

19 एवं कुर्वः । एतु भवान् ।

21 भो वयस्य आसन्नं ते प्रियं निवेदयति ।

23 भो वयस्य प्रेक्षस्व प्रेक्षस्व । एतत्खलु सविशेषघनस्निग्धपादपविशो-
भितं सुरभिहविर्गन्धगर्भितोद्दामधूमनिर्गममनुद्विग्नसुखनिषण्णशावक-
गणं तपोवनमिव लक्ष्यते ।

अवरुह्य for आरुह्य. C. वास for निवास. B_2 आश्रय for आश्रम. B_1 B_2 निरूपयामः for निरूपयावः.

19. B. om. this speech.

20. C. सूचयन् । अये for सूचयित्वा विमृश्य । सखे. B. नु for नु.

21. C. अवस्सं after वअस्स.

22. B. ब्रवीति for आह.

23. B. om. विलोक्य. B_2 इदं for एदं. B_1 B_2 साहिअं for विसोहिअं. C. गब्भिणुद्दाम for गब्भिदुद्दाम; अणुविग्गमग्गं सुह for अणुविग्गसुह & om. तवोवणं. B_2 °सोहिअसुरहिहविग्गन्धभिण्णुद्दामधूमणिग्गमसुहणिसत्थसावअगणं विलक्खीअदि ।

24. B_2 om. एव. C. कृतः for तथाहि. B_1 B_2 एव for इव. C. मम लक्ष्यजरत्कमण्डलु रजः स्वच्छम्.

Digitized by Google

दृश्यन्ते त्रुटितोज्झिताश्च बटुभिर्मौञ्जयः क्वचिन्मेखला
निशाकर्णनयाशुकेन च पदं साम्नामिदं पठ्यते ॥ १० ॥
तदेहि प्रविश्य विलोकयावः ।

प्रवेशं नाट्यतः ।

25 नाय० । सविस्मयं विलोक्य । अहो नु खलु मुदितमुनिजनप्र-
विचार्यमाणसन्दिग्धवेदवाक्यविस्तरस्य पठद्भिर्बटुजन-
च्छिद्यमानार्द्रार्द्रसमिधस्तापसकुमारिकापूर्यमाणबालवृक्षा-
लवालस्य प्रशान्तरमणीयता तपोवनस्य । इह हि

मधुरमिव वदन्ति स्वागतं भृङ्गनादै-
र्नतिमिव फलनम्रैः कुर्वतेऽमी शिरोभिः ।
मम ददत इवार्घ्यं पुष्पवृष्टिं किरन्तः
कथमतिथिसपर्यां शिक्षिताः शाखिनोऽपि ॥ ११ ॥

तन्निवासयोग्यमिदं तपोवनम् । मन्ये भविष्यतीह वसता-
मस्माकं परा निर्वृतिः ।

26 विदू०। इतस्ततो विलोक्य । भो वअस्स किं क्खु एदे इसिव-
लिअकन्धरा निच्चलमुहनिस्सरन्तदरदलिअदब्भकवला
समुण्णमिदद्दिण्णेककण्णा सुहसंमीलिदलोअणा आअ-
ण्णंता विअ हरिणा लक्खीअन्दि ।

---

26 भो वयस्य किं खल्वेते ईषद्वलितकन्धरा निश्चलमुखनिःसरद्द-
लितदर्भकवलाः समुन्नमितदत्तैकर्णाः सखसंमीलितलोचना आकर्ण-
यन्त इव हरिणा लक्ष्यन्ते ।

B. गीयते. C. अवलोकयावः. B_3 adds उभौ before प्रवेशम्.

25. B_1 B_2 प्रविश्यालोक्य च & B_3 प्रविश्य विलोक्य च. B_2 B_3 om. मुनि. B_1 B_2 असन्दिग्ध for सन्दिग्ध. C. om. बटु. B. °रम्यता for °रमणीयता. C. वदन्तः for वदन्ति & शब्दैः for नादैः. B. कुर्वतो for कुर्वते. B_1 B_2 ननु for मम. B_3 समददत इवार्घं (मम ददत इवार्घं ?). B. अदः for इदम् & अतः in place of मन्ये. C. om. परा.

26. C. om इतस्ततो विलोक्य. B. add णु after किं. C. मुहोसरन्त & B_1 B_3 मुहासरन्त (मुहावसरन्त ?) for मुहनिस्सरन्त which we with B_2. B_3 om. दर. B_1 B_2 insert गब्भ after दब्भ. C. निमीलित.

Digitized by Google

27 नाय० । कर्णं दत्वा । सखे सम्यगुपलक्षितम् । तथा हि
स्थानप्राप्त्या दधानं प्रकटितगमकं मन्द्रतारव्यवस्था
निर्हादिन्या विपञ्च्या मिलितमलिरुतेनेव तन्त्रीस्वनेन ।
एते दन्तान्तरालस्थिततृणकवलच्छेदशब्दं नियम्य
व्याजिह्माङ्गाः कुरङ्गाः स्फुटललितपदं गीतमाकर्णयन्ति॥१२॥

28 विदू० । भो वअस्स को उण एसो तवोवणे गाआदि ।

29 नाय० । यथा कोमलाङ्गुलितलाभिहन्यमाना नातिस्फुटं क्वण-
न्ति तन्त्र्यः काकलीप्रधानं गीयते तथा तर्कयामि ।
अङ्गुल्यग्रेणाग्रतो निर्दिशन् । अस्मिन् देवतायतने देवता-
माराधयन्ती काचिद्दिव्ययोषिदुपवीणयति ।

30 विदू० । भो वअस्स एहि अम्हेवि एदं देवदाअदणं पे-
क्खम्ह ।

31 नाय० । साधूक्तं भवता । वन्द्याः खलु देवताः । उपसर्पन्स-
हसा स्थित्वा । वयस्य कदाचिद्रष्टुमनर्होऽयं स्त्रीजनो भवि-
ष्यति । तदनेन तावत्तमालगुल्मकेनान्तरितौ देवतादर्श-
नावसरं प्रतिपालयावः ।

तथा कुरुतः ।

ततः प्रविशति भुमावुपविष्टा वीणां वादयन्ती मलयवती चेटी च ।

---

28 भो वयस्य कः पुनरेष तपोवने गायति ।

30 भो वयस्य एह्यावामप्येतद्देवतायतनं प्रेक्षावहे ।

---

27. B. om. सखे & तथा हि. C. समतामन्द्र° for गमकं मन्द्र°. B. मध्य for मन्द्र. B_3 °व्यवस्थां for °व्यवस्थाः. B. निर्हादिन्यां विपञ्च्यां (B_3 विपञ्चूं). C. स्वरेण. B. निशम्य.

28. B. को (B_3 adds वि) णु क्खु एसो तवोवणे कंपि सोहणं उववीणआदि ।

29. C. add एताः after यथा. B_1 B_2 लता for तल. C. om. नाति. B_1 B_2 तदाकर्णयामि for तथा तर्कयामि. C. read thus °तन्त्र्यस्तथा काकली-प्रधानं गीयत इति तर्कयामि.

30-1. C. om. एहि; read वयस्य साधूक्तं खलु भवता. B. वन्द्यन्ते for वन्द्याः खलु and insert अहो before वयस्य. C. om. स्त्री; read भवति for भविष्यति ! and तदावां तमालगुल्मान्तरितौ पश्यन्तावावसरं प्रतिपालयावः for तदनेन &c. B_3 इति before तथा. B_1 B_2 उपविष्टां for उपविष्टा.

Digitized by Google

32 नायि० । संस्कृतमाश्रित्य गायति ।

उत्फुल्लकमलकेसरपरागगौरद्युते मम हि गौरि ।
अभिवाञ्छितं प्रसिध्यतु भगवति युष्मत्प्रसादेन ॥ १३ ॥

33 नाय० । गीतमाकर्ण्य । वयस्य अहो गीतमहो वादितम् । तथा हि

व्यक्तिर्व्यञ्जनधातुना दशविधेनाप्यत्र लब्धामुना
विस्पष्टो द्रुतमध्यलम्बितपरिच्छिन्नस्त्रिधायं लयः ।
मोपुच्छप्रमुखाः क्रमेण यतयस्तिस्रोऽपि संपादिता-
स्तत्त्वौघानुगताश्च वाद्यविषयः सम्यक्त्रयो दर्शिताः ॥ १४ ॥

34 चेटी । सप्रणयम् । भट्टिदारिए चिरं क्खु तुए वादिदं । णं क्खु दे पडिस्समो अग्गहत्थाणं ।

35 नायि० । साधिक्षेपम् । हञ्जे चदुरिए गोरिए पुरदो वीणं वादअन्तीए कुदो मे पडिस्समो अग्गहत्थाणं ।

36 चेटी । भट्टिदारिए णं भणामि किं एदाए णिक्करुणाए पुरदो वीणावादिदेण जा एत्तिअं कालं कण्णकाजणदुक्करेहिं णिअमोववासेहिं आराधअन्तीए ण दे पसादं दंसेदि ।

---

34 भर्तृदारिके चिरं खलु त्वया वादितम् । न खलु ते परिश्रमोऽग्रहस्तानाम् ।

35 हञ्जे चतुरिके गौर्याः पुरतो वीणां वादयन्त्याः कुतो मे परिश्रमोऽग्रहस्तानाम् ।

36 भर्तृदारिके ननु भणामि किमेतस्या निष्करुणायाः पुरतो वीणावादितेन यैतावन्तं कालं कन्यकाजनदुष्करैर्नियमोपवासैराधयन्त्या न ते प्रसादं दर्शयति ।

---

32. C. B_1 B_2 om. संस्कृतमाश्रित्य. B. सुसिध्यतु.

33. C. कर्णं दत्त्वा for गीतमाकर्ण्य. B. insert अहो before वयस्य. C. वाद्यं for वादितम्. B_1 B_2 संदर्शिताः for संपादिताः. C. तत्त्वौघानुगताः for तत्त्वौघानुगताः. B. वाम for वाद्य.

34. B. om. सप्रणयम्. C. वादअन्तिए कुदो ण for तुए वादिदं । ण क्खु दे.

35. B. om साधिक्षेपम्. C. om. चदुरिए; read देविए for गोरिए. B. om. वीणं.

36. B. add साधिक्षेपमिव ; read देविए before पुरदो. B_2 वादएण for वादिदेण. C. उववासेहिं for उववासेहिं; add भज्जवि after आराधअन्तीए.

Digitized by Google

37 विदू० । भो वअस्स कण्णआ क्खु एसा । ता किं ण पेक्खम्ह ।

38 नाय० । को दोषः । कन्यका हि निर्दोषदर्शना भवन्ति । किन्तु कदाचिदस्मान् दृष्ट्वा बालभावसुलभकुज्ञासाध्वसात्तावच्चिरमिह तिष्ठेत् । तदनेनैव तमालान्तरेण पश्यावः ।

उभौ तथा पश्यतः ।

39 विदू० । विलोक्य सविस्मयम् । भो वअस्स पेक्ख पेक्ख । अच्चरिअं अच्चरिअं । ण केवलं वीणाविण्णाणेण एव्व कण्णाणं सुहं करेदि । इमिणा वीणाविण्णाणाणुरूवेण रूवेणवि अच्छीणं सुहं उप्पादेदि । का उण एसा भविस्सदि । किं दाव देवी । अहवा णाअकण्णआ । आहो विज्जाहरदारिआ । उत सिद्धकुलसंभवेत्ति ।

40 नाय० । सस्पृहमवलोकयन् । वयस्य केयमिति नावगच्छामि । एतत्पुनरहं जानामि

स्वर्गस्त्री यदि तत्कृतार्थमभवच्चक्षुःसहस्रं हरे-
र्नागी चेन्न रसातलं शशभृता शून्यं मुखेऽस्याः सति ।
जातिर्नः सकलान्यजातिजयिनी विद्याधरी चेदियं
स्यात्सिद्धान्वयजा यदि त्रिभुवने सिद्धाः प्रसिद्धास्ततः॥१५॥

---

37 भो वयस्य कन्यका खल्वेषा । तर्हि किं न प्रेक्षावहे ।

39 भो वयस्य प्रेक्षस्व प्रेक्षस्व । आश्चर्यमाश्चर्यम् । न केवलं वीणाविज्ञानेनैव कर्णानां सुखं करोति । अनेन वीणाविज्ञानानुरूपेण रूपेणाप्यक्ष्णां सुखमुत्पादयति । का पुनरेषा भविष्यति । किं तावद्देवी । अथवा नागकन्यका । आहो विद्याधरदारिका । उत सिद्धकुलसंभवेति ।

---

37. C. om. भो वअस्स & ता.

38. C. निर्दोषदर्शनाः कन्यकाः for कन्यका हि निर्दोषदर्शनाः. B_3 भवति for भवन्ति. C. काल (बाल ?) भावसुलभास्साध्वसात् for बाल...साध्वसात्. C. have विदू० । एव्वं करेम्ह । before उभौ &c. and om. तथा.

39. B_1 B_3 अपि before ण and om. with B_3 एव्व. C. om. कण्णाणं. B. read पि after अच्छीणं and have तक्केमि at the end.

40. B_3 तत्र for चेन्न. C. स्थिते

41 विदू० । नायकमवलोक्य सहर्षमात्मगतम् । दिट्ठिआ चिरस्स दाव कालस्स पडिदो क्खु एसो गोअरे मम्महस्स । आत्मानं निर्दिश्य भोजनमभिनीय । अहवा णहि णहि मम एव्व एकस्स बम्हणस्स ।

42 चेटी । सप्रणयम् । भट्टिदारिए णं भणामि । किं दाणिं एदाए अकिदाल्हादाए णिक्करुणाए देवीए पुरदो वाइदेण । इति वीणामाक्षिपति ।

43 नायि० । सकोपम् । हञ्जे मा भअवदिं गोरिं अधिक्खिव । णं अज्ज किदो मे भअवदिए पसाओ ।

44 चेटी । सहर्षम् । भट्टिदारिए कहेहि दाव कीदिसो सो ।

45 नायि० । हञ्जे जाणामि । अज्ज सिविणए एदं एव्व वीणं वादअन्ती भअवदीए गोरीए भणिदम्हि । वच्छे परितुट्ठम्हि दे एदिणा वीणाविण्णाणादिसएण इमाए च बा-

---

41 दिष्ट्या चिरस्य तावत्कालस्य पतितः खल्वेष गोचरे मन्मथस्य । अथवा नहि नहि ममैवैकस्य ब्राह्मणस्य ।

42 भर्तृदारिके ननु भणामि । किमिदानीमेतस्या अकृताह्लादाया निष्करुणाया देव्याः पुरतो वादितेन ।

43 हञ्जे मा भगवतीं गौरीमधिक्षिप । नन्वद्य कृतो मे भगवत्या प्रसादः ।

44 भर्तृदारिके कथय तावत्कीदृशः सः ।

45 हञ्जे जानामि । अद्य स्वप्न एतामेव वीणां वादयन्ती भगवत्या गौर्या भणितास्मि । वत्से परितुष्टास्मि ते एतेन वीणाविज्ञानातिश-

---

for सति. B_1 B_2 सफला for सकला.

41. B_3 उवरमो बम्महस्स for गोअरे मम्महस्स. B. om. भोजनमभिनीय and have only one णहि.

42. B. सप्रणयकोपम्. C.om. दाणिं, अकिदाल्हादाए & देवीए. B. गाइदेण.

43-4 B. om. णं and place अज्ज before पसाओ. C. om. सो.

45. B. अज्ज सिविणए जाणामि for जाणामि । अज्ज सिविणए. C. add मलभवदि after वच्छे. B_3 दंसणेण for अदिसएण. B. बालभावदुल्लहाए for च

Digitized by Google

लजणदुक्कराए असाहारणाए मज्झोवरि भत्तीए । ता विज्जाहरचक्कवत्ती दे अइरेण एव्व पाणिग्गहणं निव्वत्त-इस्सदित्ति ।

46 चेटी । सहर्षम् । भट्टिदारिए जइ एव्वं ता कीस सिविणओत्ति भणासि । णं हिअअट्ठिदो वरो एव्व भअवदीए देवीए दिण्णो ।

47 विदू० । भो वअस्स अवसरो क्खु अम्हाणं देवीदंसणस्स । ता एहि उवसप्पम्ह ।

48 नाय० । न तावत्प्रविशामि ।

49 विदू० । अनिच्छन्तमपि नायकं बलादाकर्षति ।

उभौ देवालयं प्रविशतः ।

50 विदू० । उपसृत्य । सोत्थि भोदीए । भोदि सच्चकं एव्व चदुरिआ भणादि । वरो एव्व दे एसो देवीए दिण्णो ।

51 नायि० । ससाध्वसमुत्तिष्ठति । नायकमुद्दिश्यापवार्य । हञ्जे को णु क्खु एसो ।

येनानया च बालजनदुष्करया ममोपरि भक्त्या । तस्माद्विद्याधरचक्रवर्ती तेऽचिरेणैव पाणिग्रहणं निर्वर्तयिष्यतीति ।

46 भर्तृदारिके यद्येवं तत्कस्मात्स्वप्न इति भणसि । ननु हृदयस्थितो वर एव भगवत्या देव्या दत्तः ।

47 भो वयस्य अवसरः खल्वावयोर्देवीदर्शनस्य । तदेह्युपसर्पावः ।

50 स्वस्ति भवत्यै । भवति सत्यमेव चतुरिका भणति । वर एव त एष देव्या दत्तः ।

51 हञ्जे को नु खल्वेषः ।

बालजणदुक्कराए; read अइरेण सअं.

46-8. C. सिविणअं इमं भणीअदि for सिविणओत्ति भणासि and om. एव्व भअवदीए. B. om. 48.

49. C. अनिच्छन्तमपि नायकमुद्दिश्य बलादाकृष्य । उपसृत्य । while we with B. which however read उभौ देवालयं प्रविशतः after उवसप्पम्ह.

50. We take उवसृत्य from 49 C. B. om. सोत्थि भोदीए and add इदो after वरो. C. सो for दे एसो.

51-2. C. उत्तिष्ठन्ती; om. अपवार्य.

Digitized by Google

52 चेटी । नायकं निरूप्यापवार्य । एदाए अणण्णसदिसाए आकिदीए एसो सो भअवदीए गोरीए पसादोत्ति तक्केमि ।

53 नायि० । सलज्जं सस्पृहं च नायकमवलोकयति ।

54 नाय० । तनुस्थियं तरलायतलोचने
श्वसितकम्पितपीनघनस्तनि ।
श्रममलं तपसैव गता पुनः
किमिति संभ्रमाधरिणि खिद्यते ॥ १६ ॥

55 नायि० । अपवार्य । हञ्जे अदिसद्धसेण ण सकुणोमि एदस्स संमुहं ठादुं । नायकं सलज्जं तिर्यक्पश्यन्ती किञ्चित्परावृत्तमुखी तिष्ठति ।

56 चेटी । भट्टिदारिए किं एदं ।

57 नायि० । हञ्जे न सकुणोमि एदस्स अच्चासण्णे चिट्ठिदुं । ता एहि आण्णदो गच्छम्ह । इत्युत्थातुमिच्छति ।

58 विदू० । भो मित्त अहं पुव्वपठिदविज्जाबलेण सम्पदं एणां मुहुतअं धारेमि । विमृश्य । भोदि किं एत्थ तुम्हाणं

---

52 एतयानन्यसदृशयाकृत्यैष स भगवत्या गौर्याः प्रसाद इति तर्कयामि ।

55 हञ्जे अतिसाध्वसेन न शक्नोम्येतस्य संमुखं स्थातुम् ।

56 भर्तृदारिके किमेतत् ।

57 हञ्जे न शक्नोम्यतस्यात्यासन्ने स्थातुम् । तदेह्यन्यतो गच्छावः ।

58 भो मित्र अहं पूर्वपठितविद्याबलेन साम्प्रतमेनां मुहूर्तं धारयामि ।

B. उण for णु क्खु. B. om. अपवार्य. B_3 om. सो. C. om. गोरीए and have पसादीकदो for पसादो.

54. B_3 °स्तनी for °स्तनि. C. °कारिणी for °धारिणि. B_3 खिद्यसे.

55-6. B. om. अपवार्य and read पुरदो before संमुहं. C. read आहिंमुही for संमुहं. B. किं णेदं for किं एदं.

57. C. आसण्णे for अच्चासण्णे. B_1B_2 वट्टिदुं for चिट्ठिदुं.

58. C. read thus, भो भाअदि क्खु एसा । मम पठिअविज्जं विअ मुहुतअं धारेमि । नायकः । को दोषः । for भो मित्त...विमृश्य and B_3 भोदि तुं अहं पुव्वपविट्ठाए वस्सलेन सपदि एणां मुहुनिअं धारेमणं । विमृश्य । for the same.

Digitized by Google

तवोवणे ईदिसो आआरो जं आअदो अदिही वअण-
मेत्तकेणावि ण संभावीअदि ।

59 चेटी । नायकमवलोक्य स्वगतम् । अणुरज्जादि विअ एत्थ एदाए दिट्ठी । भवदु एव्वं दाव भणिस्सं । प्रकाशम् । भट्टिदारिए उत्तं भणादि बम्हणो । उचिदो क्खु दे अदिहिजणस क्कारो । ता कीस एदस्सिं महाणुभावे एव्वं पडिवत्तिमुढा चिट्ठसि । अहवा चिट्ठ तुमं । अहं एव्व जहाणुरूवं करिस्सं । नायकमुद्दिश्य । साअदं महाभाअस्स । आसणपडिग्गहेण अलंकरेदु इमं पदेसं अज्जो ।

60 विदू० । भो वअस्स सोहणं एसा चदुरिआ भणादि । उवविसिअ मुहुत्तअं वीसमम्ह ।

61 नाय० । युक्तमाह भवान् ।

इत्युपविशतः ।

62 नायि० । चेटिकामुद्दिश्य । अइ परिहाससीले मा एव्वं करे-

भवति किमत्र युष्माकं तपोवन ईदृश आचारो यदागत अतिथिर्वचनमात्रेणापि न संभाव्यते ।

59 अनुराज्यत इवात्रैतस्या दृष्टिः । भवत्वेवं तावद्भणिष्यामि । भर्तृदारिके युक्तं भणति ब्राह्मणः । उचितः खलु तेऽतिथिजनसत्कारः । तत्किमेतस्मिन्महानुभाव एवं प्रतिपत्तिमूढा तिष्ठसि । अथवा तिष्ठ त्वम् । अहमेव यथानुरूपं करिष्यामि । स्वागतं महाभागस्य । आसनपरिग्रहेणालंकरोत्विमं प्रदेशमार्यः ।

60 भो वयस्य शोभनमेषा चतुरिका भणति । उपविश्य मुहूर्तं विश्राम्यावः ।

B_1 B_3 om. एत्थ. C. जण (जेण ?) for जं and वआ for वअण. Here the MS B_3 is very incorrect.

59 B. अणुरत्ता दाव for अणुरज्जादि विअ and ता एवं for भोदु एव्वं. C. om. एव्वं from एव्वं पडिवत्तिमूढा and read निर्दिश्य for उद्दिश्य.

60-1. C.om. चतुरिआ. B. विसमीअदु for वीसमम्ह. B_1 B_3 इत्युपविशति.

62. B. om. चेटिकामुद्दिश्य. B_3 °सीलं. C. om. यदि. B_3 पेक्खंतो for पेक्खादि तवो. B_1 B_3 ता for तवो.

Digitized by Google

हि । जइ कदावि कोवि तावसो पेक्खदि तदो मं अविणीदेत्ति संभावेदि ।

ततः प्रविशति तापसः ।

63 तापसः । आज्ञापितोस्मि कुलपतिना कौशिकेन यथा वत्स शाण्डिल्य पितुराज्ञया सिद्धयुवराजमित्रावसुभविष्यद्विद्याधरचक्रवर्तिनं कुमारजीमूतवाहनमिहैव मलयपर्वते क्वापिवर्तमानं भगिन्या मलयवत्या वरहेतोर्द्रष्टुमद्य गतः । तच्च प्रतीक्षमाणाया मलयवत्याः कदाचिन्मध्यन्दिनसवनवेलातिक्रामेत् । तदेनामाहूयागच्छेति । ततो यावद्गौरीगृहमेव गत्वा मलयवतीमाकार्य गच्छामि । परिक्रम्य भूमिं निरूप्य सविस्मयम् । अये कस्य पुनरियं पांसुलप्रदेशे प्रकाशचक्रचिह्ना पदपंक्तिः । पुरतो जीमूतवाहनं निर्दिश्य । नूनमस्यैवेयं महानुभावस्य पदवी । तथा हि

उष्णीषः स्फुट एष मूर्धनि विभात्यूर्णेयमन्तर्भ्रुवो-
श्चक्षुस्तामरसानुकारि हरिणा वक्षःस्थलं स्पर्द्धते ।
चक्राङ्कं च यथा पदद्वयमिदं मन्ये तथा कोप्ययं
नो विद्याधरचक्रवर्तिपदवीमप्राप्य विश्राम्यति ॥ १७ ॥

अथवा कृतं संदेहेन । व्यक्तमनेनैव जीमूतवाहनेन भवितव्यम् । मलयवतीं निरूप्य । अये इयमपि राजपुत्री मलयवती । उभौ विलोक्य । चिरात्खलु युक्तकारी विधिः

---

62 अयि परिहासशीले मैवं कुरु । यदि कदापि कोपि तापसः प्रेक्षते ततो मामविनीतेति संभावयति ।

---

63. B. om. सिद्ध and कुमार and have आगतः for अद्य गतः. C add अवधि after वेला and read तत्तपोवनगौरीगृहमेव for ततो ..आकार्य. B. परिक्रामन्नमतो भवनं (B_3 भुवं) निरूप्य and read अथ (B_3 अद्य) for अये. C. पांशुले भूप्रदेशे for पांसुलप्रदेशे ; have महापुरुषस्य for महानुभावस्य and om. पदवी. A_2 यथा and A_3 यथा for तथा. B. सुव्यक्तमनेन for व्यक्तमनेनैव; अहो for अये. C. om. मलयवती. B. read स्वगतम् after विलोक्य and सहसा before उपसृत्य.

Digitized by Google

स्याद्यदि युगलमेतदन्योन्यानुरूपं घटयेत् । उपसृत्य नायकं निर्दिश्य । स्वस्ति भवते ।

64 नाय० । भगवन् जीमूतवाहनोऽभिवादयते । उत्थातुमिच्छति ।

65 ताप० । अलमलमभ्युत्थानेन । ननु सर्वस्याभ्यागतो गुरुरिति भवानेवास्माकं पूज्यः । तद्यथासुखं स्थीयताम् ।

66 नायि० । अज्ज पणमामि ।

67 ताप० । नायिकां निर्दिश्य । वत्से अनुरूपभर्तृगामिनी भूयाः । राजपुत्रि त्वामाह कुलपतिः कौशिकः । ययातिक्रामति मध्यन्दिनसवनवेला । तत्त्वरितमागम्यतामिति ।

68 नायि० । जं गुरुजणो आणवेदि । इत्युत्थाय निःश्वस्य च स्वगतम् ।

एक्कत्तो गुरुवअणं अण्णत्तो दइअदंसणमुहाइं ।
गमणागमणविमूढं अज्जवि दोलाइ मे हिअअं ॥ १८ ॥

सलज्जं सानुरागं च नायकं तिर्यक्पश्यन्ती तापससहिता निष्क्रान्ता ।

69 नाय० । सोत्कण्ठं निःश्वस्य नायिकां पश्यन् ।

अनया जघनाभोगभरमन्थरयानया ।
अन्यतोऽपि व्रजन्त्या मे हृदये निहितं पदम् ॥ १९ ॥

---

66 आर्य प्रणमामि ।

68 यद्गुरुजन आज्ञापयति ।

एकतो गुरुवचनमन्यतो दयितदर्शनसुखानि ।
गमनागमनविमूढमद्यापि दोलायते मे हृदयम् ॥

---

64. B_1 अभिवादये for अभिवादयते. B. read thus after अभिवादयते—ता० । आयुष्मान् भूयाः । नायकः । आसनादुत्थातुमिच्छति.

65. B. read मलयवतीं प्रति । वत्से स्वति भवत्यै ।

67. B. नायकं for नायिकां ; om. राजपुत्रि ; read आह्वयति for आह ; om. यथा ; add विधि after सवन and om. इति.

68. We read जणो with B_3. C. have after आणवेदि, आत्मगतम् । एक्कत्तो गुरुवअणं अण्णत्तो ददु (इ?) अदंसणसुहंत्ति गमणागमणाधिरूढं अज्जवि मं दोलएदि हिअअं । उत्थाय निःश्वस्य सलज्जं &c.

69. C. यातया for यानया.

Digitized by Google

70 विदू० । भो दिट्ठं जं पेक्खिदव्वं । सुदं जं सोदव्वं । ता दाणिं मज्झण्णसूरसन्दावदिज्जणिदो विअ मे जठरग्गी धमधमाअदि । ता एहि निक्कमम्ह । जेण बम्हणो अदिही भविअ मुणिजणसआसादो लद्धेहिं कन्दमूलफलेहिंवि दाव पाणधारणं करिस्सं ।

71 नाय० । उर्ध्वमवलोक्य । अयेऽयं मध्यमध्यास्ते नभस्तलस्य भगवान्सहस्रदीधितिः । तथा हि

तापात्तत्क्षणघृष्टचन्दनरसापाण्डू कपोलौ वहन्
संसक्तैर्निजकर्णतालपवनैः संवीज्यमाननः ।
संप्रत्येष विशेषसिक्तहृदयो हस्तोज्झितैः सीकरैः
ग्लायच्छल्लकदुःसहामिव दशां धत्ते गजानां पतिः ॥ २० ॥

तदेह्यावामपि गच्छावः ।

इति निष्क्रान्तौ ।

॥ इति प्रथमोऽङ्कः ॥

---

70 भो दृष्टं यत्प्रेक्षितव्यम् । श्रुतं यच्छ्रोतव्यम् । तदिदानीं मध्याह्नसूर्यसंतापाद्विगुणित इव मे जठराग्निर्धमधमायते । तदेहि निष्क्रामावः । येन ब्राह्मणोऽतिथिर्भूत्वा मुनिजनसकाशाल्लब्धैः कन्दमूलफलैरपि प्राणधारणं करिष्ये ।

---

70. C. read तुए for जं and om. सुदं जं सोदव्वं. B. om. एहि. B_3 अधींदविज्जी for अदिही भविअ. C. करेमि for करिस्सं.

71. C. om. अयेऽयं. C. B_1 रसौ for रसा. B_3 संसिक्तै: for संसक्तै:; and °हृदये for °हृदयो. C. सीकरै:; B_1 गाढायल्लक°; B_2 गाढापल्लक;° B_3 गाढां यल्लक ° for ग्लायच्छल्लक.° C. om. तदेहि—गच्छावः and read इति निष्क्रान्ताः सर्वे for इति निष्क्रान्तौ. B_2 has इति श्रीहर्षकृतस्य नागानन्दनाटकस्य प्रथमोऽङ्कः.

Digitized by Google

॥ द्वितीयोऽङ्कः ॥

ततः प्रविशति चेटी ।

चेटी । आणत्तम्हि भट्टिदारिआए मलअवदीए । जहा हञ्जे मणोहारिए अज्ज चिरआदि मे भादुओ अज्जमिचावसू । ता लहु गदुअ जाणेहि किं आअदो ण वेत्ति । ता जहाणत्तं अणुचिट्ठामि । परिक्रामति । नेपथ्याभिमुखमवलोक्य । का उण एसा तुरिदतुरिदं इदो एव्व आअच्छदि । अए कहं चउरिआ ।

ततः प्रविशति द्वितीया चेटी ।

2 प्र० । उपसृत्य । हञ्जे चउरिए किंणिमित्तं तुए तुवरिदाए आअच्छीआदि ।

3 द्वि० । हला मणोहारिए आणत्तम्हि भट्टिदारिआए मलअवदीए । हञ्जे चउरिए कुसुमावचअपरिस्समणीसहं मे सरीरं । सरदादवजणिदो अअं मे संतावो अहिअदरं बाधेदि । ता गच्छ तुमं बालकदलीदलपरिक्खित्ते चन्द-

---

1 आज्ञप्तास्मि भर्तृदारिकया मलयवत्या । यथा हञ्जे मनोहारिके अद्य चिरयति मे भ्रातार्यमित्रावसुः । तल्लघु गत्वा जानीहि किमागतो न वेति । तद्यथाज्ञप्तमनुतिष्ठामि । का पुनरेषा त्वरितत्वरितमित एवागच्छति । अये कथं चतुरिका ।

2 हञ्जे चतुरिके किंनिमित्तं त्वया त्वरितया गम्यते ।

3 हला मनोहारिके आज्ञप्तास्मि भर्तृदारिकया मलयवत्या । हञ्जे चतुरिके कुसुमावचयपरिश्रमनिःसहं मे शरीरम् । शरदातपजनितोऽयं मे संतापोऽधिकतरं बाधते । तद्गच्छ त्वं बालकदलीदलपरिक्षिप्ते

---

1. B. अं हञ्जे. B$_2$ अज्जवि चिरआदि. B. भादुओ (C. भाअरो) मित्तावसू. C. om. लहु. B. जाणेहि दाव अगदो. C. om. ता जहाणत्तं अणुचिट्ठामि. B. om. तुरिदतुरिदं.

2. C. णिमित्तं उण मं पस्सिदुमिअ एव्वं तुवरिदाए गच्छीआदि. B$_2$ तुरिअतुरिअ (अं ?) for तुवरिदाए.

3. B. om. हला मणोहारिए; read अं हञ्जे. B$_1$ णीसहं खिण्णं. C. खिन्न

णलदाघरे चन्दमणिसिलाअलं सज्जीकरेहित्ति। अणुचिट्ठिदं अ मए जहा आणत्तं। जाव गदुअ भट्टिदारिआए णिवेदेम्हि।

4 प्र०। जइ एव्वं ता लहु गदुअ णिवेदेहि। जेण से तहिं गदाए उवसमादि संदावो।

5 द्वि०। विहस्यात्मगतम्। ण ईरिसो से संदावो जो एव्वं उवसमिस्सदि। विचित्तरमणीअं चन्दणलदाघरं पेक्खन्तीए अहिअदरं संदावो भविस्सदित्ति तक्केमि। प्रकाशम्। ता गच्छ तुमं। अहंपि सज्जीकदं माणिसिलाअलंत्ति गदुअ भट्टिदारिआए णिवेदेमि। [इत्युभे निष्क्रान्ते।

॥ प्रवेशकः ॥

ततः प्रविशति सात्कण्ठा मलयवती चेटी च।

6 नाथि०। निःश्वस्यात्मगतम्। अइ हिअअ तधा णाम तस्सिं जणे लज्जाए मं परंमुहीकरिअ दाणिं अप्पण्णा तहिं एव्व गदोसित्ति अहो दे अप्पंभरित्तणं। प्रकाशम्। हञ्जे आदेसहि मे भअवदीए आअदणं।

चन्दनलतागृहे चन्द्रमणिशिलातलं सज्जीकुर्विति। अनुष्ठितं च मया यथाज्ञप्तम्। यावद्गत्वा भर्तृदारिकाय निवेदयामि।

4 यद्येवं तल्लघु गत्वा निवेदय। येनास्यास्तत्र गताया उपशाम्यति संतापः।

5 नेदृशस्तस्याः संतापो य एवमुपशमिष्यति। विचित्ररमणीयं चन्दनलतागृहं प्रेक्षमाणाया अधिकतरं संतापो भविष्यतीति तर्कयामि। तद्गच्छ त्वम्। अहमपि सज्जीकृतं मणिशिलातलमिति गत्वा भर्तृदारिकायै निवेदयामि।

---

for अअं; कदलीपत्त. B. °घरे दाव; om. अ; read ता जाव.

4. B. om. गदुअ; read उवसमिस्सदि.

5. B. विसृज्यात्मगतम्; om. से; read उवसमिस्सदित्ति. B_1 om. ण. C. °ईरो for °ईरम्. B. पि सज्जं सिलादलंत्ति. C. om. उभे. C_2C_3 om. प्रवेशकः. B_3 om. सोत्कण्ठा.

6. C. om. अइ. B. तधा तस्सिं. C. जं लज्जाए मन्थरं मुहं कदुअ

7 चेटी। णं चन्दणलदाघरं भट्टिदारिआ पत्थिदा।
8 नायि०। सलज्जम्। हञ्जे सुट्ठु तुए सुमराविदम्हि। ता एहि ताहिं एव्व गच्छम्ह।
9 चेटी। एदु एदु भट्टिदारिआ। चतुरिका तदेव चन्दनलतागृहं याति।
10 नायि०। अन्यतो गच्छति।
11 चेटी। पृष्ठतो दृष्ट्वा सोद्वेगमात्मगतम्। अहो से सुण्णहिअअत्तणं। कहं तं एव्व देवीभवणं पत्थिदा। प्रकाशम्। भट्टिदारिए णं इदो चन्दणलदाघरं। ता एदो तहि दाव।
12 नायि०। सविलक्षस्मितं तथा करोति।
13 चेटी। इदं चन्दणलदाघरं। ता पविसिअ चन्दमणिसिलाअले उवविसदु भट्टिदारिआ। [उभे उपविशतः।
14 नायि०। निःश्वस्यात्मगतम्। भअवं कुसुमाउह जेण तुमं रूव-

---

6 अयि हृदय तथा नाम तस्मिञ्जने लज्जया मां पराङ्मुखीकृत्येदानीमात्मना तत्रैव गतोऽसीत्यहो त आत्मंभरित्वम्। हञ्जे आदेशय मे भगवत्या आयतनम्।
7 ननु चन्दनलतागृहं भर्तृदारिका प्रस्थिता।
8 हञ्जे सुष्ठु त्वया स्मारितास्मि। तदेहि तत्रैव गच्छावः।
9 एतु एतु भर्तृदारिका।
11 अहोऽस्याः शून्यहृदयत्वम्। कथं तदेव देवीभवनं प्रस्थिता। भर्तृदारिके नन्वितश्चन्दनलतागृहम्। तदित एहि तावत्।
13 इदं चन्दनलतागृहम्। तत्प्रविश्य चन्द्रमणिशिलातल उपविशतु भर्तृदारिका।

---

for °ल.....°कारिअ. B_3 आलअं.

7-9. B_3 ण क्खु चन्दण.° C. आत्मगतम्। चन्दणलदाघरं पत्थिदा भणादि भअवदीए आभरणं। प्रकाशम्। चन्दणलदाघरं &c; हञ्जे सुट्ठु सुमराविदं &c. C. om. चतुरिका तदेव &c.

11. B. पृष्ठतो दृष्ट्वात्मगतं सोद्वेगं च (B_3 om. च). B_1 B_2 om. णं; read ता एहि दाव. C. इदो इदो एहि.

12-3. B_1 गच्छति for तथा करोति which B_2 B_3 om. B_3 विलक्ष्य.° B. उवविसिअ समस्ससदु for उवविसदु.

14. B. मदनावस्थां नाटयन्ती after आत्मगतम्. B_3 णिक्किजदोसि गसि (?)

Digitized by Google

सोहाए णिज्जिदोसिं तस्स तुए ण किंपि कदं। मज्झ उण अणवरद्धाएवि अबलेत्ति करिअ पहरन्तो ण लज्जेसि। आत्मानं निर्वर्ण्य मदनावस्थां नाटयन्ती। प्रकाशम्। हञ्जे कीस उण घणपल्लवणिरुद्धसूरकिरणं तं एव्व चन्दणलदाघरं ण मे अज्जवि संदावदुक्खं अवणेदि।

15 चेटी। सस्मितम्। जाणामि अहं एत्थ कालणं। किं उण असंभाविणी भट्टिदारिआ ण तं पडिवज्जिस्सदि।

16 नायि०। आत्मगतम्। कहं लक्खिदा विअ अहं एदाए। तधावि पुच्छिस्सं। प्रकाशम्। हञ्जे किं तुह एदिणा। कहेहि दाव किं कालणं।

17 चेटी। एसो दे हिअअट्ठिदो वरो।

18 नायि०। सहर्षं ससंभ्रममुत्थाय द्वित्राणि पदानि गत्वा। कहिं सो।

19 चेटी। उत्थाय सस्मितम्। भट्टिदारिए सो को।

---

14 भगवन् कुसुमायुध येन त्वं रूपशोभया निर्जितोऽसि तस्य त्वया न किमपि कृतम्। मम पुनरनपराद्धाया अप्यबलेतिकृत्वा प्रहरन्न लज्जसे। हञ्जे कस्मात्पुनर्घनपल्लवनिरुद्धसूर्यकिरणं तदेव चन्दनलतागृहं न मेऽद्यापि संतापदुःखमपनयति।

15 जानाम्यहमत्र कारणम्। किं पुनरसंभाविनी भर्तृदारिका न तत्प्रतिपत्स्यते।

16 कथं लक्षितेवाहमेतया। तथापि पृच्छामि। हञ्जे किं तवैतेन। कथय तावत्किं कारणम्।

17 एष ते हृदयस्थितो वरः।

18 कुत्र सः।

19 भर्तृदारिके स कः।

ण किंचि नु(तु)ए कदं; B_1 B_2 °सि तस्सिं ण किंपि तुए किदं. B. read प्रकाशम् before आत्मानम् instead of after नाटयन्ती; add एवं after उण; °किरणं तस्सिं एव्व. B_3 वणपल्लव.°

15-6. C. एत्थ संदावस्स. B_1 B_2 पडिवज्जदि. C.om. कहं; read हञ्जे किं तं जं ण पडिवज्जिअदि। ता कहेहि दाव। किं तं कारणं after प्रकाशम्.

17. B. हिअए ट्ठिदो.

18-20. B. उत्थाय तत्तो. B_2 द्वित्तिपयाणि. B_1 B_2 एत्ता. C. कहिं कहिं

20 नायि० । सलज्जमुपविश्याधोमुखी तिष्ठति ।

21 चेटी । भट्टिदारिए णं एतदम्हि वत्तुकामा । एसो दे हिअअट्ठिदो वरो एव्व देवीए दिण्णो सिविणए । पच्छवि क्खणं एव्व परिमुक्ककुसुमबाणो विअ मअरद्धजो भट्टिदारिआए दिट्ठो । सो दे इमस्स संदावस्स कालणं । जेण एदं सहावसीअलंपि चन्दणलदाघरं ण दे संदावदुक्खं अवणेदि ।

22 नायि० । चतुरिकाया अलकं स्पृशन्ती । हञ्जे चउरिआ क्खु तुमं । किं दे अवरं पच्छादीआदि । ता कहइस्सं ।

23 चेटी । भट्टिदारिए दाणिं एव्व कहिदं । किं बहुणा पलविदेण । अलं संब्भमेण कामसंदावेण अ । जइ अहं चउरिआ ता सोवि भट्टिदारिअं अपेक्खन्तो ण मुहुत्तअंपि अण्णेहिं अहिरमिस्सदि । एदंपि मए लक्खिदं एव्व ।

---

21 भर्तृदारिके नन्वेतदस्मि वक्तुकामा । एष ते हृदयस्थितो वर एव देव्या दत्तः स्वप्ने । पश्चादपि क्षणमेव परिमुक्तकुसुमबाण इव मकरध्वजो भर्तृदारिकया दृष्टः । स तेऽस्य संतापस्य कारणम् । येनैतत्स्वभावशीतलमपि चन्दनलतागृहं न ते संतापदुःखमपनयति ।

22 हञ्जे चतुरिका खलु त्वम् । किं तेऽपरं प्रच्छाद्यते । तत्कथयिष्यामि ।

23 भर्तृदारिके इदानीमेव कथितम् । किं बहुना प्रलपितेन । अलं संभ्रमेण कामसंतापेन च । यद्यहं चतुरिका तत्सोऽपि भर्तृदारिकामप्रेक्षमाणो न मुहूर्तमप्यन्यैरभिरंस्यते । एतदपि मया लक्षितमेव ।

स्तोत्र. B. om. सो and उपविश्य.

21. C. om. णं. B_3 हिअअं इछिदो (*sic*). B. त्ति सिविणए तुए भणिदो तक्खणं एव्व वि(B_3 पवि)मुक्ककुसुमबाणो विअ (B_3 वि) for सिविणए...विअ.

22. C. om. the stage direction.

B_1B_2 अलिकं. C. सचं हञ्जे.

23. C. मा संतप्प for कामसंदावेण अ; पअसीह for अण्णेहिं; read ता एदंपि मए लक्खिदं. B_3 अल संब्भमण गता अलं संदावेण; om. अ and पि.

Digitized by Google

24 नायि० । सास्रम् । हञ्जे कुदो अम्हाणं एरिसी भाअहेअदा ।
25 चेटी । भट्टिदारिए मा एव्वं भण । किं महुसुअणो वच्छत्थलेण लच्छीं अणुव्वहन्दो णिव्वुदो होदि ।
26 नायि० । किं सुअणो पिअं वज्जिअ अण्णं भणिदुं जाणेदि । सहि अदोवि मे संदावो अधिअदरं बाधेदि । जं सो महाणुभावो वाआमेत्तकेणवि अकिदपडिवत्ती अदक्खिणेत्ति मं संभावइस्सदि । इति रोदिति ।
27 चेटी । भट्टिदारिए मा रोद । अहवा कहं ण रोदिस्सदि । अदिसअं से हिअअसंदावो बाधेदि । ता किं दाणिं एत्थ करइस्सं । ता जाव चन्दणलदापल्लवरसं से हिअए दाइस्सं । उत्थाय चन्दनपल्लवं गृहीत्वा निष्पीड्य रसं हृदये ददाति । भट्टिदारिए णं भणामि मा रोद । अअं क्खु चन्दणपल्लवरसो इमेहिं अविरदपडन्तेहिं बाहबिन्दूहिं उण्हीकिदो ण दे हिअअस्स संदावदुक्खं अवणेदि । कदलीपत्रमादाय वीजयति ।

---

24 हञ्जे कुतोऽस्माकमीदृशी भागधेयता ।
25 भर्तृदारिके मैवं भण । किं मधुसूदनो वक्षःस्थलेन लक्ष्मीमनुद्वहन्निर्वृतो भवति ।
26 किं स्वजनः प्रियं वर्जयित्वान्यद्भणितुं जानाति । सखि अतोऽपि मे संतापोऽधिकतरं बाधते । यत्स महानुभावो वाङ्मात्रेणाप्यकृतप्रतिपत्तिरदक्षिणेति मां संभावयति ।

24-5 C. एत्तिओ भाअधेओ. .B. महुमहणो. C. महसुअणो विअ. B. अणुव्वहन्दोवि.

26. B. किं वा सविणओ (B$_3$ सुअणो) पिअं; om. सहि; read संदावो एसो. C. insert मए ण संभाविदो । सोवि between वि and अकिद°. B. om. मं.

27. B चेटी । सास्रम् । भट्टिदारिए मा रोद । ना० । सास्रम् (B$_3$ साशंकम्) । कधं ण रोदिस्सं । चेटी । अदिसअं &c. C. अहिओ से हिअअसंदावो अहिअदरं बाधेदि. B. जुत्तं भोदु for करइस्सं; तं एव्व for ता जाव; om. लदा & से; सुमनः पल्लवं. B$_1$ B$_2$ निपीड्य. C. om. रसम्. B. om. भट्टिदारिए. C. add ईरिसो & B. थणवह [B$_1$ वहल (वहुल ?)] दिण्णो after क्खु. C. om. पल्लवं, have अणवरद.

Digitized by Google

28 नायि० । हस्तेन तां निवारयति । सहि मा वीजेहि । उण्हो क्खु एसो कदलीदलमारुओ ।

29 चेटी । भट्टिदारिए मा इमस्स दोसं कहेहि ।

कुणसि घणतरुणचन्दणपल्लवसंसग्गसीअलंपि इमं ।
णीसासेहिं तुमं एव्व कदलीदलमारुअं उण्हं ॥ १ ॥

30 नायि० । सात्रम् । सहि अत्थि कोवि इमस्स संदावस्स उवसमोवाओ ।

31 चेटी । भट्टिदारिए अत्थि जइ सो एव्व इहागच्छदि ।

ततः प्रविशति नायको विदूषकश्च ।

32 नाय० ।

आवृत्यव सितासितेक्षणरुचा तानाश्रमे शाखिनः
कुर्वन्त्या विटपावसक्तविलसत्कृष्णाजिनौघानिव ।

---

27 मर्तृदारिके मा रुदिहि । अथवा कथं न रोदिष्यति । अतिशयमस्या हृदयसंतापो बाधते । तत्किमिदानीमत्र करिष्यामि । तद्यावच्चन्दनलतापल्लवरसमस्या हृदये दास्यामि । भर्तृदारिके ननु भणामि मा रुदिहि । अयं खलु चन्दनपल्लवरस एभिरविरतपतद्भिर्बाष्पबिन्दुभिरुष्णीकृतो न ते हृदयस्य संतापदुःखमपनयति ।

28 सखि मा वीजय । उष्णः खल्वेष कदलीदलमारुतः ।

29 भर्तृदारिके मास्य दोषं कथय ।

करोषि घनतरुणचन्दनपल्लवसंसर्गशीतलमपीमम् ।
निःश्वासैस्त्वमेव कदलीदलमारुतमुष्णम् ॥

30 सखि अस्ति कोऽप्यस्य संतापस्योपशमोपायः ।

31 भर्तृदारिके अस्ति यदि स एवेहागच्छति ।

---

28. C. om. ताम्. B. om. इव.

29. B. दोसं करोहि. B_3 इमं दे. B_1B_2 तुमं विअ. C. read thus for the verse:—तुमं विअचन्दणपल्लवसंसग्गसीदलं इमं णीसासेहिं पवड्ढिअअ कदलीदलमारुदं उण्हं कुणसि.

30. B_3 ईदिसस्स संदावस्स. C दुक्खस्स.

31. B_1 B_2 om. जइ. C. om. एव्व; read एत्थ for इह.

32. C. व्याहृत्य; सेनैवमभ्या(B_2 °व्या)हते. B_3 विकसन्.

Digitized by Google

यदृष्टोऽस्मि तयामुनेरपि पुरस्तेनैव मय्याहते
पुष्पेषो भवता मुधैव किमिति क्षिप्यन्त एते शराः ॥ २ ॥

33 विदू० । भो वअस्स कहिं क्खु गदं दे धीरत्तणं ।

34 नाय० । वयस्य ननु धीर एवास्मि । कुतः
नीताः किं न निशाः शशाङ्कधवला नाघ्रातमिन्दीवरं
किं नोन्मीलितमालतीसुरभयः सोढाः प्रदोषानिलाः ।
हुङ्काराः कमलाकरे मधुलिहां किं वा मया न श्रुता
निर्व्याजं विधुरेष्वधीर इति मां येनाभिधत्ते भवान् ॥ ३ ॥
अथवा सम्यगभिहितं वयस्येन ।
स्त्रीहृदयेन न सोढाः क्षिप्ताः सुमेषवोऽप्यनङ्गेन ।
येनाद्यैव पुरस्तव वदामि धीर इति स कथमहम् ॥ ४ ॥

35 विदू० । आत्मगतम् । एव्वं अधीरत्तणं पडिवज्जन्देण आविकिदो अणेण महन्दो हिअअस्स आवेगो । ता जाव कहं एव्व एदं अक्खिवामि । प्रकाशम् । भो वअस्स कीस उण अज्ज तुमं लहु एव्व गुरुजणं सुस्सूसिअ इह आगदो ।

36 नाय० । वयस्य स्थाने खलु भवतः प्रश्नः । कस्य वान्यस्यैतत्कथनीयम् । अद्य खलु स्वप्ने जानामि । सैव प्रियतमा । अङ्गुल्या निर्दिशन् । अत्र चन्दनलतागृहे चन्द्रमणिशिलायामुपविष्टा प्रणयकुपिता किमपि मामुपालभमानेव मया रुदती दृष्टा । तदिच्छामि स्वप्नानुभूतदयितासमागमरम्येऽस्मिन्नेव प्रदेशे दिवसशेषमतिवाहयितुम् । तदेहि गच्छावः ।

---

33 भो वयस्य कुत्र खलु गतं ते धीरत्वम् ।

35 एवमधीरत्वं प्रतिपद्यमानेनाविष्कृतोऽनेन महान् हृदयस्यावेगः । तद्यावत्कथमेवैनमाक्षिपामि । भो वयस्य कस्मात्पुनरद्य त्वं लब्धेव गुरुजनं शुश्रूषयित्वेहागतः ।

---

33. C. क्खु दे गतं तं.

34-5. C. सुधीर; झङ्कारः...श्रुतः. B. मां केन. C. विधिरुस्थ । अथवा मृषा नाभिहितम् । वयस्यायैव नन्वधीर एवास्मि for अथवा...वयस्येन. B. कथं सोऽहम्. B_1B_2 om. इति. C. आविक्ख दो. B. आवेसो. C. कहिं; अवक्खिवामि.

36. C. om. खलु भवतः. B_1B_2 तत्कथनीयम्. B. निर्दिश्य. C. चन्द्रकान्त. B. उपा(B_2 उप)लम्भमाना;

Digitized by Google

37 विदू०। एदु एदु भवं। [परिक्रामतः।
38 चेटी। कर्णं दत्वा ससंभ्रमम्। भट्टिदारिए पदसद्दो विअ सुणीअदि।
39 नायि०। ससंभ्रममात्मानं पश्यन्ती। हञ्जे मा ईरिसं आआरं पेक्खिअ कोवि मे हिअअं तुलइस्सदि। ता उट्ठेहि। इमिणा रत्तासोअपाअवेण अन्तरिदाओ पेक्खम्ह को एसोत्ति। [तथा कुरुतः।
40 विदू०। एदं तं चन्दणलदाघरं। ता एहि पविसम्ह।
नाट्येन प्रविशतः।
41 नाय०। विलोक्य।

चन्दनलतागृहमिदं सचन्द्रमणिशिलमपि प्रियं न मम।
चन्द्राननया रहितं चन्द्रिकया सुप्तमिव निशायाः॥ ५॥

42 चेटी। दृष्ट्वा। भट्टिदारिए दिट्ठिआ वड्ढसे। सो एव्व दे एसो हिअअवल्लहो जणो।
43 नायि०। सहर्षं ससाध्वसं च। हञ्जे एणं पेक्खिअ अदिसद्धसेण ण सक्कणोमि इह एव्व आसण्णे चिट्ठिदुं। कदावि एसो

---

37 एतु एतु भवान्।
38 भर्तृदारिके पदशब्द इव श्रूयते।
39 हञ्जे मेदृशमाकारं प्रेक्ष्य कोऽपि मे हृदयं तुलयिष्यति। तदुत्तिष्ठ। अनेन रक्ताशोकपादपेनान्तरिते प्रेक्षावहे क एष इति।
40 एतत्तच्चन्दनलतागृहम्। तदेहि प्रविशावः।
42 भर्तृदारिके दिष्ट्या वर्धसे। स एव त एष हृदयवल्लभो जनः।
54 विदू० । उपसृत्य । जेदु जेदु भवं । सोत्थि भोदीए ।

55 नाय० । वयस्य चिरादायातोऽसि ।

56 विदू० । भो वअस्स लद्धु एव्व आअदोम्हि । किं उण विवाहमङ्गलमहूसवमिलिदसिद्धविज्जाहराणअदंसण-

---

52 एतत्खलु तत्कुसुमाकरोद्यानम् । तत् प्रविशतु भर्ता ।

54 जयतु जयतु भवान् । स्वस्ति भवत्यै ।

56 भो वयस्य लब्ध्वैवागतोऽस्मि । किं पुनर्विवाहमङ्गलमहोत्सवमिलित-

---

52. B. om. खलु.

53. C. विलोक्य । अहो नु कुसुमाकरोद्यानस्य परा श्रीः । इह हि ; लतामण्डपं कुट्टिमानाम्. B_3 कटिभांस्तान् (?) for कुट्टिमान्तान्. C. तारं for श्रुत्वा and गलति for चलति. B_3 मधुकराः for मधुरसम्. B. इह for इव.

55. B. विहस्य for वयस्य. C. दृष्टः for आयातः.

56. B, om. भो and मङ्गल; read °विज्जाहराणं आपण° for विज्जाहराणा-

Digitized by Google

कोदूहलेण परिब्भमन्तो एत्तिअं वेलं विलम्बिदोम्हि ।
ता पिअवअस्सोवि एदं पेक्खदु ।

57 नाय० । एवं यथाह भवान् । समन्तादवलोक्य । वयस्य पश्य पश्य

दिग्धाङ्गा हरिचन्दनेन दधतः संतानकानां स्रजो
माणिक्याभरणप्रभाव्यतिकरैश्चित्रीकृताच्छांशुकाः ।
सार्द्धं सिद्धजनैर्मधूनि दयितापीतावशिष्टान्यमी
मिश्रीभूय पिबन्ति चन्दनतरुच्छायासु विद्याधराः ॥ ९ ॥
तदेहि वयमपि तमालवीथिकां गच्छामः ।

सर्वे परिक्रामन्ति ।

58 विदू० । एसा क्खु तमालवीहिआ । एदं सरदसंदावखेदिदं भोदीए वअणं लक्खीअदि । ता इह फलिहसिलादले उपविसदु ।

59 नाय० । वयस्य सम्यगुपलक्षितम् ।

एतन्मुखं प्रियायाः शशिनं क्षिप्त्वा कपोलयोः कान्त्या
तापानुरक्तमधुना कमलं ध्रुवमीहते जेतुम् ॥ १० ॥

सिद्धविद्याधरापानकदर्शनकौतूहलेन परिभ्रमन्नेतावतीं वेलां विलम्बितोऽस्मि । तत्प्रियवयस्योऽप्येतत्प्रेक्षताम् ।

58 एषा खलु तमालवीथिका । एतच्छरत्संतापखेदितं भवत्या वदनं लक्ष्यते । तदिह स्फटिकशिलातल उपविशतु ।

पश्य° ; विलम्बिदोम्हि for विलम्बिदोम्हि and ता तुमंपि दाव पेक्ख for ता पिअ° &c.

57. B_1 om एवम्. C. अवलोकयन् for अवलोक्य. B. भो वयस्य for वयस्य पश्य पश्य. C. स्निग्ध for दिग्ध; सं तमालवीथिं for तमालवीथिकाम्. C. परिक्रामति for the stage direction. B_2 adds इति before सर्वे.

58. B_1 B_2 भो वअस्स before एसा. C एवं संचरन्ती दाव परिखेदिदा विअ भोदी दीसइ । ता इह इअ फलिहमाणसिलाअले उवविसिअ वीसमम्ह for एदं &c.

59. B. om. वयस्य. B_1 जित्वा, B_2 कृत्वा, and B_3 निहा (?) for

मलयवतीं हस्ते गृहीत्वा । प्रिये इहोपविशामः ।

सर्व उपविशन्ति ।

60 नाय० । नायिकाया मुखमुन्नमय्य पश्यन् । प्रिये वृथैव त्वमस्माभिः कुसुमाकराद्यानकुतूहलिभिः खेदिताऽसि । तथाहि

एतत्ते भ्रूलतोद्भासि पाटलाधरपल्लवम् ।
मुखं नन्दनमुद्यानमतोऽन्यत्केवलं वनम् ॥ ११ ॥

61 चेटी । सस्मितं विदूषकं निर्दिश्य । सुदं तुए भट्टिदारिआ कहं वण्णीआदि ।

62 विदू० । चउरिए मा एव्वं गव्वमुव्वह । अम्हाणंवि मज्झे दंसणीओ जणो अत्थि एव्व । केवलं मत्सरेण कोवि ण वण्णेदि ।

63 चेटी । सस्मितम् । अज्ज अहं तुमं वण्णेमि ।

64 विदू० । सहर्षम् । जीवाविदोम्हि । ता करेदु भोदी पसादं । जेण एसो मं पुणोवि ण भणादि जधा तुमं ईदिसो तादिसो कविलमक्कडाआरोत्ति ।

---

61 श्रुतं त्वया भर्तृदारिका कथं वर्ण्यते ।

62 चतुरिके मैवं गर्वमुद्वह । अस्माकमपि मध्ये दर्शनीयो जनोऽस्त्येव । केवलं मत्सरेण कोऽपि न वर्ण्यति ।

63 आर्य अहं त्वां वर्णयामि ।

64 जीवितोऽस्मि । तत्करोतु भवती प्रसादम् । येनैष मां पुनरपि न भणति यथा त्वमीदृशस्तादृशः कपिलमर्कटाकार इति ।

क्षिप्त्वा. C. नायिकाम् for मलयवतीम्; add नायिका । जं अज्ज उत्तो आणवेदि after उपविशामः. B. add अपि after सर्वे.

60. B. पश्य प्रिये for पश्यन् । प्रिये; om. एव. C. om. असि.

61. B_3 दृष्ट्वा for निर्दिश्य. C. सुदं तुए भट्टिदारिअं कहं वण्णेदि । अज्ज उण अहं तुदं वण्णेमि for सुदं...वण्णीआदि & om. 62 & 63. B add एव्वं after तुए. B_3 विण्णवीआदि for वण्णीआदि.

64. C. add भोदि after सहर्षम्. B. om. ता before करेदु & read ता जेण ण एसो पुणो मं भणादि । जधा ईदिसो कविलमक्कडाआ (B_2 B_3 गा) रोत्ति for our जेण &c.

Digitized by Google

65 चेटी। अज्ज तुमं मए विवाहजागरणे णिद्दाअमाणो णिमीलिअअक्खो सोहणो दिट्ठो। ता तह एव्व चिट्ठ जेण वण्णेमि।

66 विदू०। तथा करोति।

67 चेटी। स्वगतम्। जाव एसो णिमीलिअअक्खो चिट्ठइ ताव णीलरसाणुआरिणा तमालपल्लवरसेण मुहं से कालीकरिस्सं। उत्थाय तमालपल्लवग्रहणं तन्निर्वीडनं च नाटयति।

नायको नायिका च विदूषकं पश्यतः।

68 नाय०। वयस्य धन्यः खल्वसि योऽस्मासु तिष्ठत्सु त्वमेव वर्ण्यसे।

69 चेटी। तमालरसेन विदूषकस्य मुखं कालीकरोति।

70 नायि०। नायकस्य मुखं दृष्ट्वा स्मितं करोति।

71 नाय०। नायिकामुखं दृष्ट्वा।

स्मितपुष्पोद्गमोऽयं ते दृश्यतेऽधरपल्लवे।
फलं त्वन्यत्र मुग्धाक्षि चक्षुषोर्मम पश्यतः॥ १२॥

72 विदू०। चेडिए किं तुए किदं।

---

65 आर्य त्वं मया विवाहजागरणे निद्रायमाणो निमीलिताक्षः शोभनो दृष्टः। तत्तथैव तिष्ठ येन वर्णयामि।

67 यावदेषो निमीलिताक्षस्तिष्ठति तावन्नीलरसानुकारिणा तमालपल्लवरसेन मुखमस्य कालीकरिष्यामि।

72 चेटि किं त्वया कृतम्।

---

65. B_3 °जागरणेण. C. णिज्जाअमाणणिमीलिअअच्छो. B. om. सोहणो; read तहिं for तह & add दे after जेण. B_3 °कखवादिको for °क्खे दिट्ठो.

67. C. om. से & read उत्थाय तमालपल्लवं निष्पीड्य विदूषकस्य मुखं कालीकरोति for उत्थाय...नाटयति.

68. C. B_2 एवम् for एव. C. om. 69.

70. B. सस्मितं दृष्ट्वा नायकं पश्यति.

71. B. om. the direction. B_1 B_2 स्मितम्. B. °पल्लवः; सुजातम् for अन्यत्र.

72. C. भोदि किं.

Digitized by Google

73 चेटी। णं वण्णिदोसि।

74 विदू०। हस्तेन मुखं प्रमृज्य हस्तं दृष्ट्वा सरोषं दण्डकाष्ठमुद्यम्य। आ दासीए धीए राअउलं क्खु एदं। किं दे करिस्सं। नायकं निर्दिश्य। भो तुम्हाणं पुरदो एव्व अहं दासीए धीआए खलीकिदो। ता किं मह इह ट्ठिदेण। अण्णदो गमिस्सं दाव। निष्क्रामति।

75 चेटी। सच्चं क्खु कुविदो मे अज्जअत्तेओ। जाव अणुगदुअ पसादइस्सं। गन्तुमिच्छति।

76 नायि०। हञ्जे चउरिए कहं मं एआइणीं उज्झिअ गच्छासि।

77 चेटी। नायकमुद्दिश्य सस्मितम्। एव्वं एआइणी चिरं होहि। इति निष्क्रान्ता।

78 नाय०। नायिकाया मुखं पश्यन्।

दिनकरकरामृष्टं बिभ्रद्द्युतिं परिपाटलां
दशनकिरणैः संसर्पद्भिः स्फुटीकृतकेसरम्।

---

73 ननु वर्णितोऽसि।

74 आः दास्याः पुत्रि राजकुलं खल्वेतत्। किं ते करिष्यामि। भो युवयोः पुरत एवाहं दास्याः पुत्र्या खलीकृतः। तत्किं ममेह स्थितेन। अन्यतो गमिष्यामि तावत्।

75 सत्यं खलु कुपितो मे आर्यात्रेयः। यावदनुगम्य प्रसादयिष्यामि।

76 हञ्जे चतुरिके कथं मामेकाकिनीमुज्झित्वा गच्छसि।

77 एवमेकाकिनी चिरं भव।

---

74. C. om. हस्तम्. B_3 विण for धीए; इदं लक्खिअदि दासीए धीए लक्खीकिदो for किं दे...खलीकिदो. B. add अत्थ after दे. C. om. एव्व. B. दाव for ता. B_3 इह ता इदो for एत्थ ट्ठिदेण.

75. C. om. सच्चं क्खु. B. अज्जउत्तो. C. णं for अणु B_1 पराबइस्सं. C. B_3 om. गन्तुमिच्छति.

76. C. किं, B_3 कहिं. B. शणि गच्छसि.

77. B. तुमं एव्व after एव्वं.

78. B. om. the stage direction. C. °करैः. B. उत्सर्पद्भिः. C. यदि मुखम्; किं नैतस्मिन्निबन् प्रविभाव्यते.

Digitized by Google

अयि मुखमिदं मुग्धे सत्यं समं कमलेन ते
मधु मधुलिहः किंत्वेतस्मिन्पिबन्न विभाव्यते ॥ ११ ॥

79 नायि०। विहस्य मुखमन्यतो नयति।

80 नाय०। पुनस्तदेव पठति।

प्रविश्य पटाक्षेपेण।

81 चेटी। सहसोपसृत्य। एसो क्खु अज्जमित्तावसू कज्जेण केण-वि कुमारअं पेक्खिदुं आअदो।

82 नाय०। प्रिये गच्छ त्वमात्मनो गृहम्। अहमपि मित्रावसुं दृष्ट्वा त्वरितमागत एव।

83 नायि०। चेट्या सह निष्क्रान्ता।

ततः प्रविशति मित्रावसुः।

84 मित्रा०।

अनिहत्य तं सपत्नं कथमिव जीमूतवाहनस्याहम्।
कथयिष्यामि हतं तव राज्यं रिपुणेति निर्लज्जः ॥१४॥
अनिवेद्य च न युक्तं गन्तुमिति निवेद्य गच्छामि। इत्युपसर्पति।

85 नाय०। मित्रावसुं दृष्ट्वा। मित्रावसो इत आस्यताम्।

86 मित्रा०। उपविशति।

87 नाय०। निरूप्य। मित्रावसो संरब्ध इव लक्ष्यसे।

88 मित्रा०। कः खलु मतङ्गहतके संरम्भः।

89 नाय०। किं कृतं मतङ्गेन।

90 मित्रा०। स्वनाशाय किल युष्मदीयं राज्यं समाक्रान्तम्।

---

81 एष खल्वार्यमित्रावसुः कार्येण केनापि कुमारकं प्रेक्षितुमागतः।

---

80. C. om. पुनः. B. ततः प्रविशति चेटी for प्रविश्य पटाक्षेपेण.

81. C. om. सहसा. B. नायकं for कुमारअं. C. इच्छादि for आअदो.

84. B. तं समर्थः; तव हतम्; तथाप्यनिवेद्य न युक्तं गमनमिति. C, om. इत्युपसर्पति and add कुमार मित्रावसुः प्रणमति.

85. B. om. मित्रावसुं दृष्ट्वा; read आगम्यताम्.

89. B. मतङ्गहतकेन.

90. B. स्वात्मविनाशाय. C. आक्रान्तम्.

Digitized by Google

91 नाय०। सहर्षमात्मगतम् । अपि नाम सत्यमेतत्स्यात् ।

92 मित्रा०। अतस्तदुच्छित्तय आज्ञां दातुमर्हति कुमारः । किं बहुना

संसर्पद्भिः समन्तात्कृतसकलवियन्मार्गयानैर्विमानैः
कुर्वाणाः प्रावृषीव स्थगितरविरुचः श्यामतां वासरस्य ।
एते याताश्च सद्यस्तव वचनमितः प्राप्य युद्धाय सिद्धाः
सिद्धं चोद्वृत्तशत्रुक्षयभयविनमद्राजकं ते स्वराज्यम् ॥१५॥

अथवा किं बलौघैः ।

एकाकिनापि हि मया रभसावकृष्ट-
निस्त्रिंशदीधितिसटाभरभासुरेण ।
अद्रेर्निपत्य हरिणेव मतङ्गजेन्द्र-
माजौ मतङ्गहतकं हतमेव विद्धि ॥ १६ ॥

93 नाय०। आत्मगतम् । कर्णौ पिधाय । अहह दारुणमभिहितम् । अथवा एवं तावत् । प्रकाशम् । मित्रावसो कियदेतत् । बहुतरमपि बाहुशालिनि त्वयि संभाव्यते । किन्तु

स्वशरीरमपि परार्थं यः खलु दद्यादयाचितः कृपया ।
राज्यस्य कृते स कथं प्राणिवधक्रौर्यमनुमनुते ॥ १७ ॥

अपि च क्लेशान्विहाय ममान्यत्र शत्रुबुद्धिरेव नास्ति । तद्यदि तेऽस्मत्प्रियं कर्तुमीप्सितं तदनुकम्प्यतामसौ क्लेशवशीकृतस्तपस्वी ।

---

91. B. सत्यमेवैतत्.

92. B. तदुच्छित्तये मामेवाज्ञापयतु कुमारः. C. वियन्मध्यमानैः. B_3 वृतशत्रु. C. क्षण for क्षय. C. आरान्निपत्य. B_1 B_3 अमे निपत्य हरिणा च मतं (B_1 वथा) गजेन्द्रम्. B_3 च for इव.

93. B. किन्त्वेतद्बहुतरमतोऽपि for मित्रा°...पि. B. किं च. C. परार्थे. B_3 अयाचितम्. C. अनुमन्ये. B_3 om. अपि च. B. om. मम. C. read शत्रुबुद्धिरेव नान्यत्र. यदि त्वमस्मात्प्रियं कर्तुमीहसे तदनुकम्प्यतामसौ क्लेशवशीकृतो राज्यस्य कृते राज्यस्य तपस्वी after मम.

Digitized by Google

94 मित्रा०। सामर्षं सहासं च। कथं नानुकम्प्यत इदृशोऽसाव-
स्माकमुपकारी कृतज्ञश्च।

95 नाय०। स्वगतम्। प्रत्यग्रकोपाक्षिप्तचेतास्तावदयं न शक्यते
निवर्तयितुम्। तदेवं तावत्। प्रकाशम्। मित्रावसो उत्तिष्ठ।
अभ्यन्तरमेव प्रविशावः। तत्रैव त्वां बोधयिष्यामि।
संप्रति हि परिणतमहः। तथा हि

निद्रामुद्रामबन्धान्मधुकरमनिशं पद्मकोशादपास्य-
न्नाशापूरैककर्मप्रवणनिजकरप्रीणिताशेषविश्वः।
दृष्टः सिद्धैः प्रयुक्तस्तुतिमुखरमुखैरस्तमप्येष यास्य-
न्नेकः श्लाघ्यो विवस्वान् परहितकरणायैव यस्य प्रयासः॥१८॥

इति निष्क्रान्ताः सर्वे।

॥ इति तृतीयोऽङ्कः ॥

---

94. C. om. सहासं च. B_2 B_3 सहर्षं सहासं च. C. °कम्पनीयः. B. बाहवः. C. om. असौ; कृपणः for कृतज्ञः.

95. B_3 स्वगतमपवार्य; अभिभवयितुम्. C. अनिवार्यसंरम्भः कोप°. B. om. तदेवं तावत्. C. add तावत् before त्वाम्; om. हि; read °मुद्राव-बन्धव्यतिकरम. C. प्राणित; प्रसक्त-स्तुति; यस्य प्रसादः. B_1 B_2 om. इति &c. B_2 इति निष्क्रान्तौ. B_3 इति श्रीहर्षकृतौ नागानन्दनाटकस्य द्वि-तीयोऽङ्कः समाप्तः.

Digitized by Google

॥ चतुर्थोऽङ्कः ॥

1 ततः प्रविशति कञ्चुकी गृहीतरक्तवस्त्रयुगलः प्रतीहारश्च ।

2 कञ्चु० ।

अन्तःपुराणां विहितव्यवस्थः
पदे पदेऽहं स्खलितानि रक्षन् ।
जरातुरः संप्रति दण्डनीया
सर्वं नृपस्यानुकरोमि वृत्तम् ॥१॥

3 प्रती० । आर्य वसुभद्र क्व भवान् प्रस्थितः ।

4 कञ्चु० । आदिष्टोऽस्मि देव्या महाराजमित्रावसुजनन्या । यथा कञ्चुकिंस्त्वया दशरात्रं यावन्मलयवत्या जामातुश्च रक्तवासांसि नेतव्यानि । राजदुहिता मलयवती च श्वशुरकुले वर्तते । जीमूतवाहनोऽपि युवराजमित्रावसुना सह समुद्रवेलां द्रष्टुमद्य गत इति मया श्रुतम् । तन्न जाने किं राजपुत्र्याः सकाशं गच्छाम्युताहो जामातुरिति ।

5 प्रती० । आर्य वरं राजपुत्र्याः सकाशं गन्तव्यम् । तत्र कदाचिदियत्यां वेलायां जामातापि प्रत्यागत एव भविष्यति ।

6 कञ्चु० । सुनन्द साधूपदिष्टम् । भवता पुनः क्व गम्यते ।

7 प्रती० । अहमपि महाराजविश्वावसुना समादिष्टः । यथा सुनन्द गच्छ मित्रावसुं ब्रूहि । अस्मिन्दीपप्रतिपदुत्सवे मल-

---

1. B. om. रक्त and read युग for युगल.

2. B_3 विहिता व्यवस्था. C. सम् for अहम्; पश्यन् for रक्षन्; सर्वा वृत्तिम् for सर्वं वृतम्.

3. C. add नु खलु after क्व.

4. B. महादेव्या. C. om. महाराज. B. विश्वावसु for मित्रावसु. C. om. यथा, राज, and मलयवती. B. om. च. C. युवराजेन for युवराजमित्रावसुना; श्रूयते for मया श्रुतम्. B. om. किम्; read तावत्सकाशम्. C. अथवा for उताहो.

5. B. समीपं गतोऽसि for सकाशं गन्तव्यम्. C. तत्र हि कदाचिदस्यां वेलायां जामाता स्वयमेवागतो भविष्यति. B_1 B_3 add one more तत्र after अपि.

6. B. add one more भवता after उपदिष्टम्. C. read साधूक्तम् । अथवा भवान् पुनः क्व प्रस्थितः.

7. C. आदिष्टोऽस्मि महाराजविश्वावसुना । यथा भोः &c. B_3 प्रतीपद्

Digitized by Google

यवत्या जामातुश्चैतदुत्सवानुरूपं यत्किंचित्प्रदीयते। तदागत्य निरूप्यतामिति। तद्गच्छतु राजपुत्रीसकाशमार्यः। अहमपि युवराजमित्रावसोरानयनाय गच्छामि।

इति निष्क्रान्तौ।

विष्कम्भकः।

ततः प्रविशति जीमूतवाहनो मित्रावसुश्च।

8 नाय०।

शय्या शाद्वलमासनं शुचिशिला सङ्ग द्रुमाणामधः
शीतं निर्झरवारि पानमशनं कन्दाः सहाया मृगाः।
इत्यप्रार्थितलभ्यसर्वविभवे दोषोऽयमेको वने
दुष्प्रापार्थिनि यत्परार्थघटनावन्ध्यैर्वृथा स्थीयते॥ २॥

9 मित्रा०। ऊर्ध्वमवलोक्य। कुमार त्वर्यताम्। त्वयताम्। समयोऽयं चलितुमम्बुराशेः।

10 नाय०। आकर्ण्य। सम्यगुपलक्षितम्।

उन्मज्जज्जलकुञ्जरेन्द्ररभसास्फालानुबन्धोद्धतः
सर्वाः पर्वतकन्दरोदरभुवः कुर्वन् प्रतिध्वानिनीः।
उच्चैरुच्चरति ध्वनिः श्रुतिपथोन्माथी यथायं तथा
प्रायः प्रेङ्खदसंख्यशङ्खधवला वेलेयमागच्छति॥ ३॥

11 मित्रा०। नन्वियमागतैव। पश्य

कवलितलवङ्गपल्लवकरिमकरोद्गारसुरभिणा पयसा।
एषा समुद्रवेला रत्नद्युतिरञ्जिता भाति॥ ४॥
तदेह्यस्माज्जलप्रसरणमार्गादपक्रम्यानेनैव गिरिसानुसमीपमार्गेण परिक्रामावः।

---

for प्रतिपद्. C. read यत्किंचित्प्रदीयते। तदुत्सवानुरूपं किंचिदागत्य चिन्त्यतामिति for एतत् &c.

8. B. add मित्रावसो before the verse. B_3 शाद्वलम्; एते for इत्य°. B. दुःखप्रार्थिनि for दुष्प्रापार्थिनि and वन्ध्यै for वन्ध्यैः.

10. B. ऊर्ज्जे (B_3 ऊर्ज्जय) न् for उन्मज्जत्. B_3 बन्धोद्यतः. C. ध्वानिताः.

11. B. कुमार ननु समागतैव (B_3 °गतेयं) वेला। पश्य (B_3 पश्यत). C. B_3 उद्गारि for उद्गार. C. om. तदेहि &c.

Digitized by Google

परिक्रम्यावलोक्य च ।

12 नाय०। मित्रावसो पश्य पश्य । शरत्समयपाण्डुभिः पयोद-पटलैः प्रावृताः प्रालेयाचलशिखरश्रियमुद्वहन्त्येते मल-याचलसानवः ।

13 मित्रा०। कुमार नैवामी मलयाचलसानवः । नागानामस्थिसं-घाताः खल्वेते ।

14 नाय०। सोद्वेगम् । कष्टम् । किंनिमित्तं पुनरिमे संघातमृत्यवो जाताः ।

15 मित्रा०। कुमार नैवामी संघातमृत्यवः । श्रूयतां यथैतत् । पुरा किल स्वपक्षपवनापास्तसमस्तसागरजलस्तरसा रसातलादुद्धृत्योद्धृत्य भुजङ्गाननुदिनं समाहारयति स्म वैनतेयः ।

16 नाय०। सोद्वेगम् । कष्टमतिदुष्करं कर्म करोत्यसौ । ततस्ततः ।

17 मित्रा०। ततः सकलनागलोकविनाशाशङ्किना नागराजेन वासुकिना गरुत्मानभिहितः ।

18 नाय०। सादरम् । किं मां प्रथमं भक्षयेति ।

19 मित्रा०। नहि नहि ।

20 नाय०। किमन्यत् ।

21 मित्रा०। इदमभिहितम् । गरुत्मन् त्वदभिपातसंत्रासात्सह-

---

12. B. one पश्य. B_1 समावृताः. B_2 °शिखरम् for °शिखरश्रियम्. C. मलयसानवः.

13. C. om. कुमार & अचल; read अमी for एते. B_3 om. मलयाचल.

14. B_1 B_2 repeat कष्टम्. C. om. पुनः. B. संजाताः for जाताः.

15. B. place कुमार after °मृत्य-वः. C. इह for पुरा; °तलपूरं for °ज-लस्तरसा. C. B_3 one उद्धृत्य. C. प्रतिदिनमेकैकं नागमाहारयति वैनतेयः for भुजङ्गान् &c.

16. C. om. कर्म & असौ.

17. B. शङ्किना for आशङ्किना. C. om. नागराजेन.

18. B read thus :—सादरम् । किमभिहितो वासुकिना गरुडः । यत् (B_2 मि० । यतः) प्रथमं मां भक्षयेति. B_3 adds गरुडः नहि नहीति after इति & om. 19.

20. B. read किमन्यदुक्तम्.

21. C. उक्तम् for अभिहितम्; om.

Digitized by Google

सशः स्रवन्ति भुजङ्गमाङ्गनानां गर्भाः। शिशवश्च पञ्चत्वमुपयान्ति। एवं संततिविच्छेदोऽस्माकम्। भवतश्च स्वार्थहानिः। तद्यदर्थमभिपतति भवान्नागलोकं तमेकैकमनुदिनमहं समुद्रतटस्थितस्य ते प्रेषयामि।

22 नाय०। कष्टं किलैवं रक्षिता नागराजेन पन्नगाः।

जिह्वासहस्रद्वितयस्य मध्ये
नैकापि किं तादृगभूद्रसज्ञा।
एषोऽहिरक्षार्थमहिद्विषेऽद्य
दत्तो मयात्मेति यया ब्रवीति॥ ५॥

ततस्ततः।

23 मित्रा०। प्रतिपन्नं तत्पक्षिराजेन।

इत्येकशः प्रतिदिनं विहितव्यवस्थो
यान् भक्षयत्यहिपतीनिह पक्षिराजः।
यास्यन्ति यान्ति च गताश्च दिनैर्विवृद्धिं
तेषाममी तुहिनशैलरुचोऽस्थिकूटाः॥ ६॥

24 नाय०। साश्चर्यम्।

सर्वाशुचिनिधानस्य कृतघ्नस्य विनाशिनः।
शरीरकस्यापि कृते मूढाः पापानि कुर्वते॥ ७॥

कथमपर्यवसानेयं विपत्तिर्नागानामापतिता। आत्मगतम्।

गरुत्मन्; read भुजङ्गमानाम् for भुजङ्गमाङ्गनानाम्; add च after एवम्. B. संततिवि (B₃ सति समु) च्छेदात् for संततिविच्छेदः. C. तव चैवम् for भवतश्च. B. पातालं भवान् for भवान्नागलोकम्. C. तमिह नागमेकैमनुदिनं प्रेषयामि for तमेकैकम् &c.

22. C. कथम् for कष्टं किल. B₃ adds एवम् after किम्. C. सा तस्य किमस्ति जिह्वा for किं तादृगभूद्रसज्ञा; एकाहि for एषोऽहि. B₁ °द्विषे या, B₂ °द्विषोऽयम्, B₃ °द्विषोऽद्य for °द्विषेऽद्य. B. तदा (B₃ यथा) ब्रवीति. C. om. ततस्तत:.

23. B. add सर्वम् after तत्. C. एष भोगिपतिना for एकशः प्रतिदिनम्; पतगाधिराजः for इह पक्षिराजः.

24. C. आश्चर्यम्. B₁ B₂ अशुभ for अशुचि. C. अहो कष्ट° for कष्टम°; om. आपतिता.

Digitized by Google

अपि नाम शक्नोम्यहं स्वशरीरदानादेकस्यापि फणभृतः प्राणरक्षां कर्तुम् ।

ततः प्रविशति प्रतीहारः ।

25 प्रती०। आरूढोऽस्मि गिरिशिखरम् । यावन्मित्रावसुमन्विष्यामि । परिक्रम्य । अयं मित्रावसुर्जामातुः समीपे तिष्ठति । उपसृत्य प्रणम्य च । विजयेतां कुमारौ ।

26 मित्रा०। सुनन्द किंनिमित्तमिहागमनं ते ।

27 प्रती०। कर्णे कथयति ।

28 मित्रा०। कुमार तातो मामाह्वयति ।

29 नाय०। गम्यताम् ।

30 मित्रा०। कुमारेणापि बहुप्रत्यवायेऽस्मिन्प्रदेशे कुतूहलिना न चिरं स्थातव्यम् । इति प्रतीहारेण सह निष्क्रान्तः ।

31 नाय०। यावदहमप्यस्माद्गिरिशिखरादवतीर्य समुद्रतटमवलोकयामि । परिक्रामति ।

32 नेपथ्ये ।

हा पुत्तअ सङ्खचूड कहं वावादिअमाणो किल मए अज्ज तुमं पेक्खिदव्वो ।

33 नाय०। आकर्ण्य । अये योषित इवार्तप्रलापः । तद्यावदुपसृत्य केयं कुतो वास्या भयमिति स्फुटीकरोमि । परिक्रामति ।

---

32 हा पुत्रक शङ्खचूड कथं व्यापाद्यमानः किल मयाद्य त्वं प्रेक्षितव्यः ।

& नाम; read समर्पणेन for दानात् & नागस्य for फणभृतः. B_3 प्राणपरिक्षाम्.

25. B. om. अस्मि ; read विलोकय for परिक्रम्य ; add तदुपसर्पामि after तिष्ठति. C. om. प्रणम्य च.

26. C. om. ते.

27. B_1 B_2 add शनैः शनैः & B_3 शनैः after कर्णे.

29. B. have त्वरितम् before गम्यताम्.

30. C. om. कुतूहलिना. B_1 om. इति. C. om. प्रतीहारेण सह.

31. B. ना० । विहस्य । अस्माद् ... अवलोकयामि । (B_3 इति) परिक्रामन्.

32. C. अज्ज किल तुमं मए.

33. C. om. तद्यावदुपसृत्य. B. प्रतिभयम्. C. स्फुटीकरिष्ये ; om. जनन्या.

Digitized by Google

65 चेटी। अज्ज तुमं मए विवाहजागरणे णिद्दाअमाणो णिमीलिअअक्खो सोहणो दिट्ठो। ता तह एव्व चिट्ठ जेण वण्णेमि।

66 विदू०। तथा करोति।

67 चेटी। स्वगतम्। जाव एसो णिमीलिअअक्खो चिट्ठइ ताव णीलरसाणुआरिणा तमालपल्लवरसेण मुहं से कालीकरिस्सं। उत्थाय तमालपल्लवग्रहणं तन्निपीडनं च नाटयति।

नायको नायिका च विदूषकं पश्यतः।

68 नाय०। वयस्य धन्यः खल्वसि योऽस्मासु तिष्ठत्सु त्वमेव वर्ण्यसे।

69 चेटी। तमालरसेन विदूषकस्य मुखं कालीकरोति।

70 नायि०। नायकस्य मुखं दृष्ट्वा स्मितं करोति।

71 नाय०। नायिकामुखं दृष्ट्वा।

स्मितपुष्पोद्गमोऽयं ते दृश्यतेऽधरपल्लवे।
फलं त्वन्यत्र मुग्धाक्षि चक्षुषोर्मम पश्यतः॥ १२॥

72 विदू०। चेडिए किं तुए किदं।

---

65 आर्य त्वं मया विवाहजागरणे निद्रायमाणो निमीलिताक्षः शोभनो दृष्टः। तत्तथैव तिष्ठ येन वर्णयामि।

67 यावदेषो निमीलिताक्षस्तिष्ठति तावन्नीलरसानुकारिणा तमालपल्लवरसेन मुखमस्य कालीकरिष्यामि।

72 चेटि किं त्वया कृतम्।

---

65. B_3 °जागरणेण. C. णिज्जाअमाणणिमीलिअभच्छो. B. om. सोहणो; read तहिं for तह & add हे after जेण. B_3 °कखवादिको for °क्खे दिट्ठो.

67. C. om. से & read उत्थाय तमालपल्लवं निष्पीड्य विदूषकस्य मुखं कालीकरोति for उत्थाय...नाटयति.

68. C. B_2 एवम् for एव. C. om. 69.

70. B. सस्मितं दृष्ट्वा नायकं पश्यति.

71. B. om. the direction. B_1 B_2 स्मितम्. B. °पल्लवः; सुजातम् for अन्यच्च.

72. C. भोदि किं.

Digitized by Google

73 चेटी। णं वण्णिदोसि।

74 विदू०। हस्तेन मुखं प्रमृज्य हस्तं दृष्ट्वा सरोषं दण्डकाष्ठमुद्यम्य। आ दासीए धीए राअउलं क्खु एदं। किं दे करिस्सं। नायकं निर्दिश्य। भो तुम्हाणं पुरदो एव्व अहं दासीए धीआए खलीकिदो। ता किं मह इह ट्ठिदेण। अण्णदो गमिस्सं दाव। निष्क्रामति।

75 चेटी। सच्चं क्खु कुविदो मे अज्जअत्तेओ। जाव अणुगदुअ पसादइस्सं। गन्तुमिच्छति।

76 नायि०। हञ्जे चउरिए कहं मं एआइणीं उज्झिअ गच्छासि।

77 चेटी। नायकमुद्दिश्य सस्मितम्। एव्वं एआइणी चिरं होहि। इति निष्क्रान्ता।

78 नाय०। नायिकाया मुखं पश्यन्।

दिनकरकरामृष्टं बिभ्रद्द्युतिं परिपाटलां
दशनकिरणैः संसर्पद्भिः स्फुटीकृतकेसरम्।

---

73 ननु वर्णितोऽसि।

74 आः दास्याः पुत्रि राजकुलं खल्वेतत्। किं ते करिष्यामि। भो युवयोः पुरत एवाहं दास्याः पुत्र्या खलीकृतः। तत्किं ममेह स्थितेन। अन्यतो गमिष्यामि तावत्।

75 सत्यं खलु कुपितो मे आर्यात्रेयः। यावदनुगम्य प्रसादयिष्यामि।

76 हञ्जे चतुरिके कथं मामेकाकिनीमुज्झित्वा गच्छसि।

77 एवमेकाकिनी चिरं भव।

---

74. C. om. हस्तम्. B_3 विण for धीए; इदं लक्खिअदि दासीए धीए लक्खीकिदो for किं दे...खलीकिदो. B. add अत्थ after दे. C. om. एव्व. B. दाव for ता. B_3 इह ता इदो for एत्थ ट्ठिदेण.

75. C. om. सच्चं क्खु. B. अज्जउत्तो. C. णं for अणु B_1 पराबद्दइस्सं. C. B_3 om. गन्तुमिच्छति.

76. C. किं, B_3 कहिं. B. णणि गच्छसि.

77. B. तुमं एव्व after एव्वं.

78. B. om. the stage direction. C. °करैः. B. उत्सर्पद्भिः. C. यदि मुखम्; किं नैतस्मिन्निबद्धं प्रविभाव्यते.

Digitized by Google

अयि मुखमिदं मुग्धे सस्यं समं कमलेन ते
मधु मधुलिहः किंत्वेतस्मिन्पिबन्न विभाव्यते ॥ ११ ॥

79 नायि०। विहस्य मुखमन्यतो नयति।

80 नाय०। पुनस्तदेव पठति।

प्रविश्य पटाक्षेपेण।

81 चेटी। सहसोपसृत्य। एसो क्खु अज्जमित्तावसू कज्जेण केण-वि कुमारअं पेक्खिदुं आअदो।

82 नाय०। प्रिये गच्छ त्वमात्मनो गृहम्। अहमपि मित्रावसुं दृष्ट्वा त्वरितमागत एव।

83 नायि०। चेट्या सह निष्क्रान्ता।

ततः प्रविशति मित्रावसुः।

84 मित्रा०।

अनिहत्य तं सपत्नं कथमिव जीमूतवाहनस्याहम्।
कथयिष्यामि हृतं तव राज्यं रिपुणेति निर्लज्जः ॥१४॥
अनिवेद्य च न युक्तं गन्तुमिति निवेद्य गच्छामि। इत्युपसर्पति।

85 नाय०। मित्रावसुं दृष्ट्वा। मित्रावसो इत आस्यताम्।

86 मित्रा०। उपविशति।

87 नाय०। निरूप्य। मित्रावसो संरब्ध इव लक्ष्यसे।

88 मित्रा०। कः खलु मतङ्गहतके संरम्भः।

89 नाय०। किं कृतं मतङ्गेन।

90 मित्रा०। स्वनाशाय किल युष्मदीयं राज्यं समाक्रान्तम्।

---

81 एष खल्वार्यमित्रावसुः कार्येण केनापि कुमारकं प्रेक्षितुमागतः।

---

80. C. om. पुनः. B. ततः प्रविशति चेटी for प्रविश्य पटाक्षेपेण.

81. C. om. सहसा. B. नायकं for कुमारअं. C. इच्छदि for आअदो.

84. B. तं समर्थः; तव हृतम्; तथाप्यनिवेद्य न युक्तं गमनमिति. C. om. इत्युपसर्पति and add कुमार मित्रावसुः प्रणमति.

85. B. om. मित्रावसुं दृष्ट्वा; read आगम्यताम्.

89. B. मतङ्गहतकेन.

90. B. स्वात्मावेनाशाय. C. आक्रान्तम्.

Digitized by Google

91 नाय०। सहर्षमात्मगतम् । अपि नाम सत्यमेतत्स्यात् ।

92 मित्रा०। अतस्तदुच्छित्तय आज्ञां दातुमर्हति कुमारः । किं बहुना

संसर्पद्भिः समन्तात्कृतसकलवियन्मार्गयानैर्विमानैः
कुर्वाणाः प्रावृषीव स्थगितरविरुचः श्यामतां वासरस्य ।
एते याताश्च सद्यस्तव वचनमितः प्राप्य युद्धाय सिद्धाः
सिद्धं चोद्वृत्तशत्रुक्षयभयविनमद्राजकं ते स्वराज्यम् ॥१५॥

अथवा किं बलौघैः ।

एकाकिनापि हि मया रभसावकृष्ट-
निस्त्रिंशदीधितिसटाभरभासुरेण ।
अद्रेर्निपत्य हरिणेव मतङ्गजेन्द्र-
माजौ मतङ्गहतकं हतमेव विद्धि ॥ १६ ॥

93 नाय०। आत्मगतम् । कर्णौ पिधाय । अहह दारुणमभिहितम् । अथवा एवं तावत् । प्रकाशम् । मित्रावसो कियदेतत् । बहुतरमपि बाहुशालिनि त्वयि संभाव्यते । किन्तु

स्वशरीरमपि परार्थं यः खलु दद्यादयाचितः कृपया ।
राज्यस्य कृते स कथं प्राणिवधक्रौर्यमनुमनुते ॥ १७ ॥

अपि च क्लेशान्विहाय ममान्यत्र शत्रुबुद्धिरेव नास्ति । तद्यदि तेऽस्मत्प्रियं कर्तुमीप्सितं तदनुकम्प्यतामसौ क्लेशवशीकृतस्तपस्वी ।

---

91. B. सत्यमेवैतत्.

92. B. तदुच्छित्तये मामेवाज्ञापयतु कुमारः. C. वियन्मध्यमानैः. B_3 वृतशत्रु. C. क्षण for क्षय. C. आराज्ञिपत्य. B_1 B_3 भमे निपत्य हरिणा च मतं (B_1 यथा) गजेन्द्रम्. B_3 च for इव.

93. B. किन्त्वेतद्बहुतरमतोऽपि for मित्रा°...पि. B. किं च. C. परार्थे. B_3 अयाचितम्. C. अनुमन्ये. B_3 om. अपि च. B. om. मम. C. read शत्रुबुद्धिरेव नान्यत्र। यदि त्वमस्मत्प्रियं कर्तुमीहसे तदनुकम्प्यतामसौ क्लेशवशीकृतो राज्यस्य कृते राज्यस्य तपस्वी after मम.

Digitized by Google

94 मित्रा०। सामर्षं सहासं च। कथं नानुकम्प्यत इदृशोऽसाव-
स्माकमुपकारी कृतज्ञश्च।

95 नाय०। स्वगतम्। प्रसभप्रकोपाक्षिप्तचेतास्तावदयं न शक्यते
निवर्तयितुम्। तदेवं तावत्। प्रकाशम्। मित्रावसो उत्तिष्ठ।
अभ्यन्तरमेव प्रविशावः। तत्रैव त्वां बोधयिष्यामि।
संप्रति हि परिणतमहः। तथा हि

निद्रामुद्रामबन्धान्मधुकरमनिशं पद्मकोशादपास्य-
न्नाशापूरैककर्मप्रवणनिजकरप्रीणिताशेषविश्वः।
दृष्टः सिद्धैः प्रयुक्तस्तुतिमुखरमुखैरस्तमप्येष यास्य-
न्नेकः श्लाघ्यो विवस्वान् परहितकरणायैव यस्य प्रयासः॥१८॥

इति निष्क्रान्ताः सर्वे।

॥ इति तृतीयोऽङ्कः ॥

---

94. C. om. सहासं च. B_1 B_3 सहर्षं सहासं च. C. °कम्पनीयः. B. याहशः. C. om. असौ; कृपणः for कृतज्ञः.

95. B_3 स्वगतमपवार्य; अभिभवयितुम्. C. अनिवार्यसंरम्भः कोप°. B. om. तदेवं तावत्. C. add तावत् before त्वाम्; om. हि; read °मुद्राव-बन्धव्यतिकरम. C. प्राणित; प्रसक्त-स्तुति; यस्य प्रसादः. B_1 B_3 om. इति &c. B_2 इति निष्क्रान्तौ. B_3 इति श्रीहर्षकृतौ नागानन्दनाटकस्य द्वि-तीयोऽङ्कः समाप्तः.

Digitized by Google

॥ चतुर्थोऽङ्कः ॥

1 ततः प्रविशति कञ्चुकी गृहीतरक्तवस्त्रयुगलः प्रतीहारश्च ।

2 कञ्चु० ।

अन्तःपुराणां विहितव्यवस्थः
पदे पदेऽहं स्खलितानि रक्षन् ।
जरातुरः संप्रति दण्डनीया
सर्वं नृपस्यानुकरोमि वृत्तम् ॥१॥

3 प्रती० । आर्य वसुभद्र क्व भवान् प्रस्थितः ।

4 कञ्चु० । आदिष्टोऽस्मि देव्या महाराजमित्रावसुजनन्या । यथा कञ्चुकिंस्त्वया दशरात्रं यावन्मलयवत्या जामातुश्च रक्तवासांसि नेतव्यानि । राजदुहिता मलयवती च श्वशुरकुले वर्तते । जीमुतवाहनोऽपि युवराजमित्रावसुना सह समुद्रवेलां द्रष्टुमद्य गत इति मया श्रुतम् । तन्न जाने किं राजपुत्र्याः सकाशं गच्छाम्युताहो जामातुरिति ।

5 प्रती० । आर्य वरं राजपुत्र्याः सकाशं गन्तव्यम् । तत्र कदाचिदियत्यां वेलायां जामातापि प्रत्यागत एव भविष्यति ।

6 कञ्चु० । सुनन्द साधूपदिष्टम् । भवता पुनः क्व गम्यते ।

7 प्रती० । अहमपि महाराजविश्वावसुना समादिष्टः । यथा सुनन्द गच्छ मित्रावसुं ब्रूहि । अस्मिन्दीपप्रतिपदुत्सवे मल-

---

1. B. om. रक्त and read युग for युगल.

2. B_3 विहिता व्यवस्था. C. सम् for अहम्; पइयन् for रक्षन्; सर्वां वृत्तिम् for सर्वं वृतम्.

3. C. add नु खलु after क्व.

4. B. महादेव्या. C. om. महाराज. B. विश्वावसु for मित्रावसु. C. om. यथा, राज, and मलयवती. B. om. च. C. युवराजेन for युवराजमित्रावसुना; भूयते for मया श्रुतम्. B. om. किम्; read तावत्सकाशम्. C. अथवा for उताहो.

5. B. समीपं गतोऽसि for सकाशं गन्तव्यम्. C. तत्र हि कदाचिदस्यां वेलायां जामाता स्वयमेवागतो भविष्यति. B_1 B_2 add one more तत्र after अपि.

6. B. add one more भवता after उपदिष्टम्. C. read साधूक्तम् । अथवा भवान् पुनः क्व प्रस्थितः.

7. C. आदिष्टोऽस्मि महाराजविश्वावसुना । यथा भोः &c. B_3 प्रतीपद्

Digitized by Google

यवत्या जामातुश्चैतदुत्सवानुरूपं यत्किंचित्प्रदीयते। तदागत्य निरूप्यतामिति। तद्गच्छतु राजपुत्रीसकाशमार्यः। अहमपि युवराजमित्रावसोरानयनाय गच्छामि।

इति निष्क्रान्तौ।

विष्कम्भकः।

ततः प्रविशति जीमूतवाहनो मित्रावसुश्च।

8 नाय०।

शय्या शाद्वलमासनं शुचिशिला सङ्ग द्रुमाणामधः
शीतं निर्झरवारि पानमशनं कन्दाः सहाया मृगाः।
इत्यप्रार्थितलभ्यसर्वविभवे दोषोऽयमेको वने
दुष्प्रापार्थिनि यत्परार्थघटनावन्ध्यैर्वृथा स्थीयते ॥ २ ॥

9 मित्रा०। उर्ध्वमवलोक्य। कुमार त्वर्यताम्। त्वयताम्। समयोऽयं चलितुमम्बुराशेः।

10 नाय०। आकर्ण्य। सम्यगुपलक्षितम्।

उन्मज्जज्जलकुञ्जरेन्द्ररभसास्फालानुबन्धोद्धतः
सर्वाः पर्वतकन्दरोदरभुवः कुर्वन् प्रतिध्वानिनीः।
उच्चैरुच्चरति ध्वनिः श्रुतिपथान्माथी यथायं तथा
प्रायः प्रेङ्खदसंख्यशङ्खधवला वेलेयमागच्छति ॥ ३ ॥

11 मित्रा०। नन्वियमागतैव। पश्य

कवलितलवङ्गपल्लवकरिमकरोद्गारसुरभिणा पयसा।
एषा समुद्रवेला रत्नद्युतिरञ्जिता भाति ॥ ४ ॥
तदेह्यस्माज्जलप्रसरणमार्गादपक्रम्यानेनैव गिरिसानुसमीपमार्गेण परिक्रामावः।

---

for प्रतिपद्. C. read यत्किंचित्प्रदीयते। तदुत्सवानुरूपं किंचिदागत्य चिन्त्यतामिति for एतत् &c.

8. B. add मित्रावसौ before the verse. B_3 शाद्वलम्; एते for इत्य°. B. दुःखप्रार्थिनि for दुष्प्रापार्थिनि and वन्ध्यै for वन्ध्यैः.

10. B. ऊर्ज्जं (B_3 ऊर्ध्वं) त् for उन्मज्जत्. B_3 बन्धोद्यतः. C. ध्वानिताः.

11. B. कुमार ननु समागतैव (B_3 °गतेवेयं) वेला। पश्य (B_3 पश्यत). C. B_3 उद्गारि for उद्गार. C. om. तदेहि &c.

Digitized by Google

परिक्रम्यावलोक्य च ।

12 नाय०। मित्रावसो पश्य पश्य । शरत्समयपाण्डुभिः पयोद-पटलैः प्रावृताः प्रालेयाचलशिखरश्रियमुद्वहन्त्येते मलयाचलसानवः ।

13 मित्रा०। कुमार नैवामी मलयाचलसानवः । नागानामस्थिसंघाताः खल्वेते ।

14 नाय०। सोद्वेगम् । कष्टम् । किंनिमित्तं पुनरिमे संघातमृत्यवो जाताः ।

15 मित्रा०। कुमार नैवामी संघातमृत्यवः । श्रूयतां यथैतत् । पुरा किल स्वपक्षपवनापास्तसमस्तसागरजलस्तरसा रसातलादुद्धृत्योद्धृत्य भुजङ्गाननुदिनं समाहारयति स्म वैनतेयः ।

16 नाय०। सोद्वेगम् । कष्टमतिदुष्करं कर्म करोत्यसौ । ततस्ततः ।

17 मित्रा०। ततः सकलनागलोकविनाशाशङ्किना नागराजेन वासुकिना गरुत्मानभिहितः ।

18 नाय०। साद्रम् । किं मां प्रथमं भक्षयेति ।

19 मित्रा०। नहि नहि ।

20 नाय०। किमन्यत् ।

21 मित्रा०। इदमभिहितम् । गरुत्मन् त्वदभिपातसंत्रासात्सह-

---

12. B. one पश्य. B_1 समावृताः. B_3 °शिखरम् for °शिखरश्रियम्. C. मलयसानवः.

13. C. om. कुमार & अचल; read अमी for एते. B_3 om. मलयाचल.

14. B_1 B_3 repeat कष्टम्. C. om. पुनः. B. संजाताः for जाताः.

15. B. place कुमार after °मृत्यवः. C. इह for पुरा; °तलपूरं for °जलस्तरसा. C. B_3 one उद्धृत्य. C. प्रतिदिनमेकैकं नागमाहारयति वैनतेयः for भुजङ्गान् &c.

16. C. om. कर्म & असौ.

17. B. शङ्किना for आशङ्किना. C. om. नागराजेन.

18. B read thus :—साद्रम् । किमभिहितो वासुकिना गरुडः । यत् (B_3 मि० । यतः) प्रथमं मां भक्षयेति. B_3 adds गरुडः नहि नहीति after इति & om. 19.

20. B. read किमन्यदुक्तम्.

21. C. उक्तम् for अभिहितम्; om.

Digitized by Google

सशः स्रवन्ति भुजङ्गमाङ्गनानां गर्भाः। शिशवश्च पञ्चत्वमुपयान्ति। एवं संततिविच्छेदोऽस्माकम्। भवतश्च स्वार्थहानिः। तद्यदर्थमभिपतति भवान्नागलोकं तमेकैकमनुदिनमहं समुद्रतटस्थितस्य ते प्रेषयामि।

22 नाय०। कष्टं किलैवं रक्षिता नागराजेन पन्नगाः।

जिह्वासहस्रद्वितयस्य मध्ये
नैकापि किं तादृगभूद्रसज्ञा।
एषोऽहिरक्षार्थमहिद्विषेऽद्य
दत्तो मयात्मेति यया ब्रवीति॥ ५॥

ततस्ततः।

23 मित्रा०। प्रतिपन्नं तत्पक्षिराजेन।

इत्येकशः प्रतिदिनं विहितव्यवस्थो
यान् भक्षयत्यहिपतीनिह पक्षिराजः।
यास्यन्ति यान्ति च गताश्च दिनैर्विवृद्धिं
तेषाममी तुहिनशैलरुचोऽस्थिकूटाः॥ ६॥

24 नाय०। साश्चर्यम्।

सर्वाशुचिनिधानस्य कृतघ्नस्य विनाशिनः।
शरीरकस्यापि कृते मूढाः पापानि कुर्वते॥ ७॥

कथमपर्यवसानेयं विपत्तिर्नागानामापतिता। आत्मगतम्।

गरुत्मन्; read भुजङ्गनानाम् for भुजङ्गमाङ्गनानाम्; add च after एवम्. B. संततिवि (B$_3$ सति सु) च्छेदात् for संततिविच्छेदः. C. तव चैवम् for भवतश्च. B. पातालं भवान् for भवान्नागलोकम्. C. तमिह नागमेकैमनुदिनं प्रेषयामि for तमेकैकम् &c.

22. C. कथम् for कष्टं किल. B$_3$ adds एवम् after किम्. C. सा तस्य किमस्ति जिह्वा for किं तादृगभूद्रसज्ञा; एकाहि for एषोऽहि. B$_1$ °द्विषे या, B$_2$ °द्विषोऽयम्, B$_3$ °द्विषोऽद्य for °द्विषेऽद्य. B. तदा (B$_3$ यथा) ब्रवीति. C. om. ततस्तत:.

23. B. add सर्वम् after तत्. C. एष भोगिपतिना for एकशः प्रतिदिनम्; पतगाधिराजः for इह पक्षिराजः.

24. C. आश्चर्यम्. B$_1$ B$_2$ अशुभ for अशुचि. C. अहो कष्ट° for कष्टम°; om. आपतिता.

Digitized by Google

अपि नाम शक्नोम्यहं स्वशरीरदानादेकस्यापि फणभृतः प्राणरक्षां कर्तुम् ।

ततः प्रविशति प्रतीहारः ।

25 प्रती०। आरूढोऽस्मि गिरिशिखरम् । यावन्मित्रावसुमन्वेष्यामि । परिक्रम्य । अयं मित्रावसुर्जामातुः समीपे तिष्ठति । उपसृत्य प्रणम्य च । विजयेतां कुमारौ ।

26 मित्रा०। सुनन्द किंनिमित्तमिहागनं ते ।

27 प्रती०। कर्णे कथयति ।

28 मित्रा०। कुमार तातो मामाह्वयति ।

29 नाय०। गम्यताम् ।

30 मित्रा०। कुमारेणापि बहुप्रत्यवायेऽस्मिन्प्रदेशे कुतूहलिना न चिरं स्थातव्यम् । इति प्रतीहारेण सह निष्क्रान्तः ।

31 नाय०। यावदहमप्यस्माद्गिरिशिखरादवतीर्य समुद्रतटमवलोकयामि । परिक्रामति ।

32 नेपथ्ये ।

हा पुत्तअ सङ्खचूड कहं वावादिअमाणो किल मए अज्ज तुमं पेक्खिदव्वो ।

33 नाय०। आकर्ण्य । अये योषित इवार्तप्रलापः । तद्यावदुपसृत्य केयं कुतो वास्या भयमिति स्फुटीकरोमि । परिक्रामति ।

---

32 हा पुत्रक शङ्खचूड कथं व्यापाद्यमानः किल मयाद्य त्वं प्रेक्षितव्यः ।

& नाम; read समर्पणेन for दानात् & नागस्य for फणभृतः. B_3 प्राणपरिक्षाम्.

25. B. om. अस्मि ; read विलोकय for परिक्रम्य ; add तदुपसर्पामि after तिष्ठति. C. om. प्रणम्य च.

26. C. om. ते.

27. B_1 B_2 add शनैः ; शनैः & B_3 शनैः after कर्णे.

29. B. have त्वरितम् before गम्यताम्.

30. C. om. कुतूहलिना. B_1 om. इति. C. om. प्रतीहारेण सह.

31. B. ना० । विहस्य । अस्माद् ... अवलोकयामि । (B_3 इति) परिक्रामन्.

32. C. अज्ज किल तुमं मए.

33. C. om. तद्यावदुपसृत्य. B. प्रतिभयम्. C. स्फुटीकारिष्ये ; om. अनन्या.

Digitized by Google

ततः प्रविशति रुदत्या वृद्धया जनन्यानुगम्यमानः
शङ्खचूडो गोपायितवस्त्रयुगलश्च किङ्करः ।

34 वृद्धा। हा पुत्तअ सङ्खचूड कहं वावादिअमाणो किल मए अज्ज तुमं पेक्खिदव्वो । चिबुके गृहीत्वा । इमिणा मुहचन्देण विरहिदं मज्झ हिअअं अन्धआरीभविस्सदि पाआलंवि ।

35 शङ्ख०। अम्ब किमेवमतिविक्लवतया मुतरां नः पीडयसि ।

36 वृद्धा। चिरं निर्वर्ण्य पुत्रस्याङ्गानि स्पृशन्ती । हा पुत्तअ कहं एदं दे अदिट्ठसूरकिरणं सुउमारं सरीरं णिग्घिण्णहिअओ गरुडो आहारइस्सदि । कण्ठे गृहीत्वा तारं रोदिति।

37 शङ्ख०। अम्ब अलं परिदेवितेन । पश्य

क्रोडीकरोति प्रथमं यदा जातमनित्यता ।
धात्रीव जननी पश्चात्तदा शोकस्य कः क्रमः ॥ ८ ॥

गन्तुमिच्छति।

38 वृद्धा। पुत्तअ मुहूत्तअंपि चिट्ठ । दाव दे वअणं पेक्खामि ।

---

34 हा पुत्रक शङ्खचूड कथं व्यापाद्यमानः किल मयाद्य त्वं प्रेक्षितव्यः । अनेन मुखचन्द्रेण विरहितं मम हृदयमन्धकारीभविष्यति पातालमपि ।

36 हा पुत्रक कथमेतत्तेऽदृष्टसूर्यकिरणं सुकुमारं शरीरं निर्घृणहृदयो गरुड आहारयिष्यति ।

38 पुत्रक मुहूर्तकमपि तिष्ठ । यावत्ते वदनं प्रेक्षे ।

---

34. C. अज्ज किल तुमं मए. B_1 B_3 किल अज्ज तुमं मए. C. चिबुकम्. B. add हे after °चन्देण. C. add दाणिं after विरहिदं & om. मज्झ हिअअं & वि.

35. C. इति वैक्लव्येन.

36. C. om. चिरम् & एदं ; read सुउमारसरीरं णिग्घिणिओ ; om. तारम्.

37. B_3 अलमम्ब. B. om. गन्तुमिच्छति.

38. C. चिट्ठ मुहत्तअं for मुहुत्तअं. पि चिट्ठ. B. place हे after वअणं.

Digitized by Google

39 किङ्क०। साक्षेपम्। एहि कुमार सङ्खचूड एहि। किं तुज्झ मादाए भणन्तीए। पुत्तसिणेहमोहिदा क्खु एसा ण जाणेदि लाअकज्जं।

40 शङ्ख०। अयमागच्छामि।

41 किङ्क०। आत्मगतम्। आणीदो क्खु एसो मए वज्झसिलासमीवं। जाव एदं वज्झचिण्हं लत्तंसुअजुअलं देइअ वज्झसिलं दंसेमि।

42 नाय०। दृष्ट्वा। अये इयमसौ योषित्। शङ्खचूडं दृष्ट्वा। नूनमनेनास्याः सुतेन भवितव्यं यदर्थमाक्रन्दति। समन्तादवलोक्य। न खल्वस्याः किंचिद्भयकारणं पश्यामि। कुतोऽस्या भयं भविष्यति। किमुपसृत्य पृच्छामि। अथवा प्रसक्त एवायमालापः। कदाचिदत एवास्याभिव्यक्तिर्भविष्यति। तद्विटपान्तरितस्तावच्छृणोमि। तथा करोति।

43 किङ्क०। सास्रं कृताञ्जलिः। कुमार सङ्खचूड एसो सामिणो आदेसोत्ति करिअ ईदिसं णिट्ठुरं मन्तीअदि।

44 शङ्ख०। भद्र कथय।

---

39 एहि कुमार शङ्खचूड एहि। किं ते मात्रा भणन्त्या। पुत्रस्नेहमोहिता खल्वेषा न जानाति राजकार्यम्।

41 आनीतः खल्वेष मया वध्यशिलासमीपम्। यावदेनं वध्यचिह्नं रक्तांशुकयुगलं दत्वा वध्यशिलां दर्शयामि।

43 कुमार शङ्खचूड एष स्वामिन आदेश इति कृत्वेदृशं निष्ठुरं मन्त्र्यते।

---

39. C. om. साक्षेपम् & second एहि; read एदाए for मादाए. B_1 B_2 मोहिदाए. B. लाज (B_2°य, B_3°ब) कज्जं ण जाणादि एसा.

40. B. add अहम् after अयम्.

41. C. add अमतो विलोक्य after आत्मगतम्; read समीवे for समीवं & ता वज्झचिण्हं दाइस्सं for जाव &c. B_1 देखेमि, B_2 दंखेमि.

42. C. om. दृष्ट्वा। अये; read तत्किम् for यदर्थम्. B. om. अस्याः. C. भयकारणं किंचित्; इति। यावदुपसर्पामि for भविष्यति। किमुपसृत्य पृच्छामि; om. अथवा; add एतेषाम् after अयम्. B_2 प्रसक्तम्. B. om. कदाचित् & अस्य & read व्यक्तीभविष्यति; add एव after अन्तरितः. C. om. तथा करोति.

43. B_1 B_2 om. सास्रम् & add with B_2 सन् after °अञ्जलिः.

Digitized by Google

45 किङ्क०। णाअलोअस्सामी वासुई दे आणवेदि।
46 शङ्ख०। शिरस्यञ्जलिं कृत्वा सादरम्। किमाज्ञापयति स्वामी।
47 किङ्क०। एदं लत्तंसुअजुअलं पलिहाय आलुह वज्झसिलं। जेण तुमं रत्तंसुअचिण्होवलक्खिदं गरुडो गेण्हिअ आहालं करेदित्ति।
48 नाय०। कष्टमयमसौ तपस्वी वासुकिना परित्यक्तो गरुत्मत आहाराय दत्तः।
49 किङ्क०। सङ्खचूड गेण्ह एदं। इति वस्त्रयुगलमर्पयति।
50 शङ्ख०। सादरम्। उपनय। इति गृहीत्वा। गृहीतः शिरसि स्वाम्यादेशः।
51 वृद्धा। पुत्रस्य हस्ते वाससी दृष्ट्वा सोरस्ताडम्। हा वच्छ एदं क्खु वज्झपाडसण्णिभं संभावीअदि। इति मूर्च्छिता पतति।
52 किङ्क०। आसण्णा क्खु गरुडस्स आगमणवेला। ता लहु अवक्कमेमि। इति निष्क्रान्तः।
53 शङ्ख०। अम्ब समाश्वसिहि समाश्वसिहि।

---

45 नागलोकस्वामी वासुकिस्त आज्ञापयति।
47 एतद्रक्तांशुकयुगलं परिधायारुह वध्यशिलाम्। येन त्वां रक्तांशुकचिह्नोपलक्षितं गरुडो गृहीत्वाहारं करोतीति।
49 शङ्खचूड गृहाणेदम्।
51 हा वत्स एतत्खलुवज्रपातसंनिभं संभाव्यते।
52 आसन्ना खलु गरुडस्यागमनवेला। तल्लघ्वपक्रामामि।

---

45. C. नागलाजा वासुई आणवेदि.
46. C. बद्धा for कृत्वा. B. om. सादरम्. C. देवः for स्वामी.
47. C. लत्तंसुअं उवलक्खिअ गलुडो आहालइस्सदि for रत्तंसुअ &c. B_3 अव for उव. B. om. त्ति.
48. C. श्रुत्वा। कयमसौ वासुकिना परित्यक्तः only. B_3 गरुत्पतेः.
49. C. कुमाल गेण्ह एदं वसणजुअलं। इत्यर्पयति.
50. C. om. इति & गृहीतः. B_3 om. गृहीत्वा. B_3 om. गृहीतः.
51. B_1 B_3 °ताडनम्. B. हा पुत्तअ पुत्तअ एदं क्खु वज्झसिलाचिण्हं पलिहाअ सा आरोहीअदि. C. मोहं गता.
52. C. om. क्खु; read गच्छामि for अवक्कमेमि. B. किङ्करो निष्क्रान्तः.
53. C. one समाश्वसिहि.

Digitized by Google

54 वृद्धा। समाश्वस्य सास्रम् । हा जाद । हा पुत्त । हा मणोरह-
सतलङ्घ । हा भत्त । हा विणअसाअर । कहिं दे उण
ईदिसं पुण्णिमाचन्दसरिच्छं मुहं पेक्खिस्सं । कण्ठे गृहीत्वा
रोदिति ।

55 नाय०। अहो नैर्घृण्यं गरुत्मतः । आपि च

मूढाया मुहुरश्रुसंततिमुचः कृत्वा प्रलापान्बहून्
कस्त्राता तव पुत्रकेति कृपणां दिक्षु क्षिपन्त्या दृशम् ।
अङ्के मातुरवस्थितं शिशुमिमं त्यक्त्वा घृणामश्नत-
श्चञ्चुर्नैव खगाधिपस्य हृदयं वज्रेण मन्ये कृतम् ॥ ९ ॥

56 शङ्ख०। दुःखातिशयान्मातुर्हृदयस्फोटं शङ्कमानो मातरं प्रति ।

यैरत्यन्तदयापरैर्न विहिता वन्ध्यार्थिनां प्रार्थना
यैः कारुण्यपरिग्रहान्न गणितः स्वार्थः परार्थं प्रति ।
ये नित्यं परदुःखदुःखिताधियस्ते साधवोऽस्तं गता
मातः संहर बाष्पवेगमधुना कस्याग्रतो रुद्यते ॥ १० ॥
स्वहस्तेन मातुरश्रूणि मार्जयन् । अम्ब किमिति वैक्लव्यं ते ।
मातः समाश्वासिहि समाश्वासिहि ।

57 वृद्धा । सास्रम् । पुत्तअ कहं समस्सासिदव्वं । किं एक्को एव्व
पुत्तओ त्ति कदुअ जादाणुकंपेण ण णिवारिदो णाअ-

---

54 हा जात । हा पुत्र । हा मनोरथशतलङ्घ । हा भक्त । हा वि-
नयसागर । क्व ते पुनरीदृशं पौर्णिमाचन्द्रसदृशं मुखं प्रेक्षिष्ये ।

57 पुत्रक कथं समाश्वसितव्यम् । किं एक एव पुत्रक इति कृत्वा जा-

---

54. B. उच्चै रोदिति for सास्रम्. C. om. हा जाद; read कहिं पुणो तुमं पेक्खिस्सं । कण्ठे गृह्णाति for हा भत्त &c.

55. B. add अति before नैर्घृण्यम्. C. गरुडस्य. B. अन्यच्च for अपि च. C. कृपणम्. B. उपागतम् for अवस्थितम्. C. चञ्चुनैव for चञ्चुर्नैव.

56. C. आत्मनोऽश्रूणि निवारयन् । अम्ब किमिति वैक्लव्येन । ननु समाश्वसिहि for the whole speech. B, मातिवैक्लव्यम्.

57. C. कहं समस्सासिस्सं । किं एकपुत्तकोत्ति कदुअ साणुकम्पेण णाअराएण पेसिहोसि । हा कहं अविच्छिण्णे जीअलोए मम पुत्तओ दुमरिसे । सव्व-

Digitized by Google

राएण वासुइणा। हा किदन्दहदअ कहं दाणिं तुए णिग्घिण्णहिअएण एव्वं अविच्छिण्णे जीअलोए मह पुत्तो ण विसुमरिदो। सव्वधा हदंम्हि मन्दभाइणी। इति पुनर्मूर्च्छति।

58 नाय०। सकरुणम्।

आर्तं कण्ठगतप्राणं परित्यक्तं स्वबान्धवैः।
त्रायेनैनं यदि ततः कः शरीरेण मे गुणः॥ ११॥
तद्यावदुपसर्पामि।

59 शङ्ख०। अम्ब संस्तम्भयात्मानम्।

60 वृद्धा। हा पुत्तअ सङ्खचूड जदा णाअलोअपरिरक्खएण वासुइणा परिच्चतोसि तदा को दे अवरो परित्ताणं करिस्सदि जेणाहं समस्ससिमि।

61 नाय०। सत्वरमुपसृत्य। नन्वहमहम्।

62 वृद्धा०। ससंभ्रमं गरुडभ्रान्त्या स्वोत्तरीयेण पुत्रमाच्छादयन्ती

तानुकम्पेन न निवारितो नागराजेन वासुकिना। हा कृतान्तहतक कथमिदानीं त्वया निर्घृणहृदयेनैवमविच्छिन्ने जीवलोके मम पुत्रो न विस्मृतः। सर्वथा हतास्मि मन्दभागिनी।

60 हा पुत्रक शङ्खचूड यदा नागलोकपरिरक्षकेन वासुकिना परित्यक्तोऽसि तदा कस्तेऽपरः परित्राणं करिष्यति येनाहं समाश्वसिमि।

धा अहंम्हि मन्दभग्गा। मूर्च्छति for पुत्तअ &c. B_1 एक्को एसो, B_2 एक्क एस. B_3 णिव्भाविदो, B_3 णिवत्तोविदो for णिवारिदो. B_1 B_3 om. तुए; read °हिअअ. B_1 विच्छिण्णे जीअलोअम्मि, B_2 विच्छिण्णे जीअलोअम्मि, B_3 विच्छिण्णजीवलोओवि. B_1 हदं हि, B_3 रुदम्हि.

58. B. om. सकरुणम्. C. बन्धुभिः. B_1 B_3 तदा for ततः.

59. B. स्तम्भय.

60. C. om. सङ्खचूड. B. add हाव after जदा & सभं एव्व after वासुइणा. B. पीडिदा (B_3 पट्टितो) तदा को परिताआदि for परि°...करिस्सदि. C. om. जेण &c.

61. C. om. सत्वरम्

62. C. नाथकं दृष्ट्वा before ससंभ्रमम्; om. गरुडभ्रान्त्या. B_2 B_3 आच्छादयति. C. add जानुभ्यां स्थित्वा

नायकमुपसृत्य । विणआणन्दण खादेहि मं । अज्ज अहं दे णाअराएण आहारणिमित्तं परिकप्पिदा ।

63 नाय०। सबाष्पम् । अहो पुत्रवात्सल्यम् ।

अस्या विलोक्य मन्ये पुत्रस्नेहेन विक्लवत्वमिदम् ।
अकरुणहृदयः करुणां करिष्यति भुजङ्गशत्रुरपि ॥१२॥

64 शङ्ख०। अम्ब अलमलं त्रासेन । न खल्वयं नागशत्रुः । पश्य

महाहिमस्तिष्कविभेदमुक्त-
रक्तच्छटार्चितचण्डचञ्चुः ।
क्वासौ गरुत्मान् क्व च नाम सौम्यः
सत्त्वस्वभावाकृतिरेष साधुः ॥ १३ ॥

65 वृद्धा। पुत्त अहं क्खु तुज्झ मरणभीदा सव्वंपि जीअलोअं गरुडमअं पेक्खामि ।

66 नाय०। अम्ब मा भैषीः । नन्वहं विद्याधरस्तव पुत्ररक्षणार्थमेवागतः । अतस्त्वं धीरा भव ।

67 वृद्धा०। सहर्षम् । पुत्तअ पुणोवि एताइं अक्खराइं भण ।

68 नाय०। किमनेन पुनः पुनरभिहितेन । ननु कर्मणैव संपादयामि ।

---

62 विनतानन्दन खादय माम् । अद्याहं ते नागराजेनाहारनिमित्तं परिकल्पिता ।

65 पुत्र अहं खलु तव मरणभीता सर्वमपि जीवलोकं गरुडमयं प्रेक्षे ।

67 पुत्रक पुनरप्येतान्यक्षराणि भण ।

---

after उपसृत्य. B. add पढमं after विणआणन्दण. C. वावादेहि. B. om. णाअराएण & आहार; read वासुइणा after परिकप्पिदा.

63. C. सासम्. B. कुर्वीत for करिष्यति.

64. C. B_2 have one अलम्. C. om. खल्वयम्; read सौम्यस्वभावाकृतिः. B_2 एव for एषः.

65. C. om. पुत्त. B. मरणभअभीदा. B_1 B_2 om. पि. C. एव्व for पि; have लोअ simply.

66. B_2 यतः for अतः. C. om. this & the following speech.

67. B_2 adds हाव after पि.

68. C. अम्ब किम् for किमनेन.

Digitized by Google

69 वृद्धा०। चिरञ्जीवं वत्स। पुत्रक चिरं जीव।

70 नाय०।

ममैतदम्बार्पय वध्यचिह्नं प्रावृत्य यद्वै विनतासुताय।
पुत्रस्य ते जीवितरक्षणार्थं स्वदेहमाहारयितुं ददामि ॥१४॥

71 वृद्धा। कर्णौ पिधाय। पडिहदं अमङ्गलं। जाद तुमं सङ्खचूडणिव्विसेसो एव्व पुत्तओ। अहवा सङ्खचूडादोवि अहिअरो जो एव्वं बन्धुजणपरिच्चत्तंपि मे पुत्तअं णिअसरीरदाणेण परिरक्खिदुमिच्छसि।

72 शङ्ख०। सविषादम्। अहो जगद्विपरीतमस्य महासत्त्वस्य चेतः। कुतः

विश्वामित्रः श्वमांसं श्वपच इव पुरा भक्षयद्यन्निमित्तं
नाडीजङ्घो निजघ्ने कृततदुपकृतिर्यत्कृते गौतमेन।
पुत्रोऽयं कश्यपस्य प्रतिदिनमुरगानत्ति तार्क्ष्यो यदर्थं
प्राणांस्तानेष साधुस्तृणमिव कृपया यः परार्थे जहाति ॥१५॥

नायकमुद्दिश्य। भो महात्मन् दर्शिता त्वयेयमात्मप्राणप्रदानव्यवसायनिर्व्याजा मयि दयालुता। तदलमनेन निर्बन्धेन। पश्य

---

69 पुत्रक चिरं जीव।

71 प्रतिहतममङ्गलम्। जात त्वं शङ्खचूडनिर्विशेष एव पुत्रकः। अथवा शङ्खचूडादप्यधिकतरो य एवं बन्धुजनपरित्यक्तमपि मे पुत्रकं निजशरीरदानेन परिरक्षितुमिच्छसि।

---

70. B_1 reads मातः before the verse. B. एव for अम्ब. B_1 B_2 तद्वै & C. यावत् for यद्वै. C. आत्मजाय & रक्षणाय.

71. क्खु एदं for अमङ्गलं; om. जाद; add पि aftar तुमं. B. °सरिच्छो for णिव्विसेसो. C. om. एव्व. B. om. वि; read अहिओ for अहिअरो; om. पि. C. पुत्तअं मे; सरीरप्पदाणेण रक्खिदुं for णिअ° ... °रक्खिदुं. B_2 पणेण for दाणेण. B. इच्छसि.

72. C. om. सविषादम्. B_2 गोपनेन for गौतमेन. B. एव चित्रम् for एष साधुः. C. दहति for जहाति; महासत्व for महात्मन्; read एव after दर्शिता; om. प्राण; read कृपा for

जायन्ते च म्रियन्ते च मादृशाः क्षुद्रजन्तवः।
परार्थं बद्धकक्षाणां त्वादृशामुद्भवः कुतः॥ १६॥
तत्किमनेन निर्बन्धेन। प्रसीद मुच्यतामयमध्यवसायः।

73 नाय०। शङ्खचूडं करे गृहीत्वा। कुमार शङ्खचूड न मे चिराल्लब्धावसरस्यास्य परार्थसंपादनामनोरथस्यान्तरायं कर्तुमर्हसि। तदलं विकल्पेन। दीयतां मे वध्यचिह्नम्।

74 शङ्ख०। भो महात्मन् हे साहसिकाग्रणीः किं वृथा प्रयासेन। न खलु शङ्खचूडः शङ्खधवलं शङ्खपालकुलं मलिनीकरिष्यति। अथानुकम्पनीया वयं तदियमस्मद्विपत्तिविक्लवाम्बा यथा न परित्यजति जीवितं तथाभ्युपायश्चिन्त्यताम्।

75 नाय०। किमत्र चिन्त्यते। ननु चिन्तित एवोपायः। स च त्वदायत्तः।

76 शङ्ख०। क इव।

77 नाय०।

म्रियते म्रियमाणे या त्वयि जीवति जीवति।
तां यदीच्छसि जीवन्तीं रक्षात्मानं ममासुभिः॥ १७॥
अयमेवाभ्युपायः। तदर्पय वध्यचिह्नम्। यावदनेनात्मान-

इवा. B_3 om. पद्म. B. उत्पद्यन्ते for जायन्ते च. C. मद्विधाः, B_1 मादृशः for मादृशाः. B. परार्थदत्तदेहानाम्; ते मरणाग्रहेण for निर्बन्धेन. C. om. प्रसीद.

73. C. om. शङ्खचूडं करे गृहीत्वा। कुमार. B_3 धृत्वा for गृहीत्वा. B. यथार्थसंपादित° for परार्थसंपादना°; add पादयोः पतित्वा after अर्हसि. C. add एतत् after दीयताम् & om. मे.

74. C. भो महासत्त्व किमनेन वृथात्मायासेन. B. °करोति for °करिष्यति. C. यदि ते वयमनुकम्पनीयास्तदेवमस्मद्विपत्तिविक्लवाम्बा मा यथा जीवितं जह्यात् for अयं...जीवितम्. B_1 B_2 तस्मात् for तत्. B_3 add मरणान्निवर्ततेऽथवा यथा after जीवितम्. B_3 read मरणान्न निवर्ततेऽथवा यथा in place of तथा.

75. B_3 om. ननु. C. om. ननु ... आयत्तः & 76.

77. B. च for या; om. ताम्. C. यत् for यदि. B. वाञ्छसि for इच्छसि. C. om. एव; add त्वरितम् after वध्यचिह्नम्; प्रच्छाद्य; आत्मा-

माच्छाद्य वध्यशिलामारोहामि । त्वमपि जननीं पुरस्कृत्यास्मात्प्रदेशान्निवर्तस्व । कदाचिदियमालोक्य सन्निकृष्टमाघातस्थानं स्त्रीस्वभावकातरतया प्राणत्यजेत् । किं न पश्यति भवानिदं विपन्नपन्नगानेककङ्कालसंकुलं महाश्मशानम् । तथा हि

चञ्चच्चञ्चूग्रकृत्तच्युतपिशितलवग्राससंवृद्धगर्धै-
र्गृध्रैराबद्धपक्षद्वितयविधुतिभिर्बद्धसान्द्रान्धकारे ।
वक्त्रोद्वान्ताः पतन्त्यः शमितशिखिशिखाश्रेणयोऽस्मिञ्शिवाना-
मस्रस्रोतस्यजस्रस्रुतबहलवसावासविस्रे स्वनन्ति ॥ १८ ॥

78 शङ्ख०। कथं न पश्यामि

प्रतिदिनमशून्यमहिनाहारेण विनायकाहितप्रीति ।
शशिधवलास्थिकपालं वपुरिव रौद्रं स्मशानमिदम् ॥ १९ ॥

तद्गच्छ । किमेभिः सामोपन्यासैः । आसन्नः खलु मरुडानमनसमयः । मातुरग्रतो जानुभ्यां स्थित्वा शिरोनिहिताञ्जलिः।

अम्ब त्वमपि निवर्तस्वेदानीम् ।
समुत्पत्स्यामहे मातर्यस्यां यस्यां गतौ वयम् ।
तस्यां तस्यां प्रियसुते माता भूयास्त्वमेव नः ॥ २० ॥

पादयोः पतति ।

देशात् for अस्मात्प्रदेशात्. B. add एव after अस्मात्. C. अम्बा for इयम्. B_1 B_2 एव & B_3 एवम् after आलोक्य. C. घातस्थानं संनिकृष्टम्. B_3 संनिकृष्टस्थानम्. C. °कातरत्वेन for °कातरतया. B. किंच न पश्यसि त्वमिदं विपन्नपन्नगानामनेक°; om. तथा हि. B_1 B_2 °धृतार्ध°, B_3 °उद्वृत्तार्ध° for °अग्रकृत्त°. B_1 संबद्धलक्षैः, B_2 संवृद्धपक्षैः, B_3 संवर्द्धपक्षैः for संवृद्धगर्धैः. B. आविद्ध for आबद्ध; and °अन्धकारैः. B_1 यत्रोद्गान भ्रमन्त्यः स्थगिताशिखिशिखाः, B_2 B_3 वक्त्रोद्वान्ताः पतन्त्यस्थगित (B, स्थिगित) शिखिशिखा°. B. अजस्रम्. C. स्रुति for स्रुत. B. बहल; and मिश्रे for विस्रे. See the note on the above verse for the readings.

78. C. om. अशून्यम्; read नायकः। शङ्खचूड तद्गच्छ । किमेभिः सामोपन्यासैः । शङ्ख० । for तद्गच्छ...°उपन्यासैः. B. न्यास for साम. C. om. शिरोनिहिताञ्जलिः. B_1 °सुता, B_2 °सुत.

Digitized by Google

79 वृद्धा। सास्रम् । हा कहं अवच्छिमं से वअणं । पुत्तअ ण क्खु तुमं उज्झिअ अण्णदो मे पाआ वहन्ति । ता अहंपि तुए एव्व सह मरिस्सं ।

80 शङ्क०। उत्थाय । यावदहमप्यदूरे भगवन्तं दक्षिणगोकर्णं प्रदक्षिणीकृत्य स्वाम्यादेशमनुतिष्ठामि । मात्रा सह निष्क्रान्तः ।

81 नाय०। संपन्नं मेऽभिलषितम् । तत्को नामाभ्युपायः ।

ततः प्रविशति सह वाससा कञ्चुकी ।

82 कञ्चु०। इदं रक्तांशुकयुगलं देव्वा मित्रावसुजनन्या प्रेषितम् । तदेतत्परिधत्तां कुमारः ।

83 नाय०। दृष्ट्वा सहर्षमात्मगतम् । दिष्ट्या सिद्धमभिवाञ्छितमनेनातर्कितोपनतेन रक्तांशुकयुगलेन । प्रकाशम् । कञ्चुकिन्नुपनय ।

84 कञ्चु०। रक्तवसनद्वयमर्पयति ।

85 नाय०। गृहीत्वा परिधाय स्वगतम् । सफलीभूतो मे मलयवत्याः पाणिग्रहः । प्रकाशम् । कञ्चुकिन् गम्यताम् । मद्वचनादभिवादनीया देवी ।

86 कञ्चु०। यदाज्ञापयति कुमारः । इति निष्क्रान्तः ।

---

79 हा कथमपश्चिममस्य वचनम् । पुत्रक न खलु त्वामुज्झित्वान्यतो मे पादौ वहतः । तदहमपि त्वयैव सह मरिष्यामि ।

---

79. C. अवच्छिमवअणं पुत्तअ for अवच्छिमं से वअणं । पुत्तअ ; om. एव्व ; read चिट्ठिस्सं for मरिस्सं.

80. C. अवात् for यावत्. B. add अस्मादुत्तरेण after अपि. C. उभौ निष्क्रान्तौ.

81. B_1 मे संपन्नम्. B_2 B_3 कटं मे संपन्नम्. B_3 सहसा for सह वाससा. For 81, 82, 83, 84, C. read thus:—ना० । दृष्ट्वा सहर्षमात्मगतम् । दिष्टया सिद्धमभिवाञ्छितमनेनातर्कितोपनतेन रक्तांशुकयुगलेन । प्रविश्य कञ्चुकी । इदं वासोयुगं देव्या मित्रावसुजनन्या कुमाराय प्रेषितम् । तदेतत्परिधत्तां कुमारः । ना० । साहस्रम् । उपनय । कञ्चु० । उपनयति ।

82. B_3 add अम्ब before देव्वा.

85. C. om. परिधाय. B. om. मे; add त्वया after °वचनात्. B_3 अभिवन्दनीया.

Digitized by Google

92 नाय०। आत्मगतम्। दिष्ट्या कृतार्थोऽस्मि।

93 गरु०। नायकं कवलयम्।

नागानां रक्षिता भाति गुरुरेष यथा मम।
तथा सर्पाशनाकाङ्क्षां व्यक्तमस्यापनेष्यति॥ २९॥

तद्यावदेनं गृहीत्वा मलयपर्वतमारुह्य यथेष्टमाहारयामि।

इति निष्क्रान्तः।

॥ इति चतुर्थोऽङ्कः॥

---

92. B. om. आत्मगतम्.

93. C. कलयन् for कवलयन्. B. तथा यथा for यथा तथा; om. एनं गृहीत्वा and add एव after यावत् and इमम् after कवेटम्. B_1 B_2 add जीमूतवाहनं गृहीत्वा गरुडः after इति. B_2 इति श्रीहर्षकृतौ नागानन्दे नाटके चतुर्थोऽङ्कः समाप्तः.

Digitized by Google

॥ पञ्चमोऽङ्कः ॥

1 ततः प्रविशति प्रतीहारः ।

2 प्रती० ।

स्वगृहोद्यानगतेऽपि स्निग्धे पापं विशङ्कयते स्नेहात् ।
किमु दृष्टबहूपायप्रतिभयकान्तारमध्यस्थे ॥ १ ॥

तथा हि । जीमूतवाहनो जलधिवेलावलोकनकुतूहली निष्क्रान्तश्चिरयतीति दुःखमास्ते महाराजविश्वावसुः । तत्समादिष्टोऽस्मि तेन । यथा सुनन्द श्रुतं मया संनिहितगरुडप्रतिभयमुद्देशं जामाता जीमूतवाहनो गत इति । शङ्कित एवास्म्यनेन वृत्तान्तेन । तत्चरितं विज्ञायागच्छ किमसौ गृहमायतो न वेति । तद्यावत्तत्र गच्छामि । परिक्रामन्नग्रतो विलोक्य । अये अयमसौ राजर्षिर्जीमूतवाहनस्य पिता जीमूतकेतुरुटजाङ्गने सहधर्मचारिण्या राजपुत्र्या वध्वा चोपास्यमानस्तिष्ठति । तथा हि

सौम्ये भङ्गवती तरङ्गतरले फेनाम्बुतुल्ये वहन्
जाह्नव्येव विराजितः सुपयसा देव्या महापुण्यया ।
धत्ते तोयनिधेरयं सुसदृशीं जीमूतकेतुः श्रियं
यस्यैषान्तिकवर्तिनी मलयवत्याभाति वेला यथा ॥ २ ॥

तद्यावदुपसर्पामि ।

ततः प्रविशत्यासनस्थः पत्नीवधूसमेतो जीमूतकेतुः ।

---

1. B. add सुनन्दो नाम after प्रविशति.

2. C_1 C_2 B_2 विश्वावसुते. C_1 C_2 B_1 B_2 °अपाये. C. जलनिधि. B. महाराजो विश्वावसुः. C. om. तत्. B_2 B_3 add तत्र before गतः and read with B_3 तेन for अनेन. C. om. वृत्तान्तेन; read स्वगृहम्; and om. तत्. B. अत्र for तत्र. C. read अमे दृष्ट्वा for अग्रतो विलोक्य:; om. अये; read सह स्वधर्मचारिण्या; om. वध्वा; and add परि before उपास्यमाना. B. तरङ्गितचलत् for तरङ्गतरले; सवयसा for सुपयसा; तु for स; एव for एषा; तत्तावदुपसृत्य पृच्छामि. C. om. आसनस्थः.

Digitized by Google

3 जीमू०।

भुक्तानि यौवनसुखानि यशो विकीर्णं
राज्ये स्थितं स्थिरधियाचरितं तपोऽपि।
श्लाघ्यः सुतः सुसदृशान्वयजा स्नुषेयं
चिन्त्यो मया ननु कृतार्थतयाद्य मृत्युः॥ ३॥

4 प्रती०। सहसोपसृत्य। जीमूतवाहनस्य।

5 जीमू०। कर्णौ पिधाय। शान्तं पापं शान्तं पापम्।

6 वृद्धा०। पडिहदममङ्गलम्।

7 नाय०। स्वगतम्। वेवदि मे हिअअं इमिणा दुण्णिमित्तेण।

8 जीमू०। भद्र किं जीमूतवाहनस्य।

9 प्रती०। जीमूतवाहनस्य वार्तामन्वेष्टुं प्रेषितोऽस्मि युष्मदन्तिकं महाराजविश्वावसुना।

10 जीमू०। किमसंनिहितस्तत्र मे पुत्रः।

11 प्रती०। अथ किम्।

12 वृद्धा। सविषादम्। महाराअ जइ तहिं ण सण्णिहिदो ता कहिं गदो मे पुत्तओ भविस्सदि।

---

6 प्रतिहतममङ्गलम्।

7 वेपते मे हृदयमनेन दुर्निमित्तेन।

12 महाराज यदि तत्र न संनिहितस्तत्कुत्र गतो मे पुत्रको भविष्यति।

---

3. C. अवकीर्णं for विकीर्णम्. B. तपोभिः for तपोऽपि; स्व for सु; and एव for अद्य.

5. C. शान्तं पापम् once only.

6. B_1 B_2 देवी for वृद्धा. C. add कस्तु एवं after पडिहदं. B_3 reads सुनन्दा। सहसोपसृत्य। जीमू०। कर्णौ पिधाय। शान्तं पापम्। प्रतिहतममङ्गलम्। वृद्धा। प्र० for 4, 5, and 6.

7. C. B_2 om. स्वगतम्. B_1 B_3 विभ in place of मे.

8. C. वामाक्षिस्पन्दनं सूचयित्वा before भद्र. B. add तत् after किम्.

9. B. अन्वेषयितुम् and add तन्नाज्ञापयतु महाराजः किमहं स्वामिने निवेदयामि after विश्वावसुना.

10. C. वत्सः for पुत्र; om. 11.

12. B. सविषादम्। जहि तहिं ण-

13 जीमू०। नियतमस्मत्प्राणयात्रार्थं नितान्तदूरं गतो भविष्यति।
14 नायि०। सविषादमात्मगतम्। अहं उण अज्जउत्तं अपेक्खन्ती अण्णं एव्व कंपि आसङ्केमि।
15 प्रती०। आज्ञापयतु महाराजः किं मया स्वामिने निवेदनीयम्।
16 जीमू०। वामाक्षिस्पन्दनं सूचयन्। जीमूतवाहनश्चिरयतीति पर्याकुलोऽस्मि हृदयेन।

स्फुरसि किमदक्षिणेक्षण मुहुर्मुहुः कथयितुं ममानिष्टम्।
हतचक्षुरपहतं ते स्फुरितं मम पुत्रकः कुशली ॥ ४ ॥

ऊर्ध्वमवलोक्य। अयमेव त्रिभुवनैकचक्षुर्भगवान् सहस्रदीधितिः स्फुटं जीमूतवाहनस्य श्रेयः करिष्यति। अवलोक्य सविस्मयम्।

आलोक्यमानमतिलोचनदुःखदायि
रक्तच्छटा निजमरीचिरुचो विमुञ्चत्।
उत्पातवाततरलीकृततारकाभ-
मेतत्पुरः पतति किं सहसा नभस्तः ॥ ५ ॥

कथं चरणयोरेव निपातितम्।

सर्वे सविस्मयं निरूपयन्ति।

---

14 अहं पुनरार्यपुत्रमप्रेक्षमाणान्यदेव किमप्याशङ्के।

स्थिता कहिं गदा सामि भविस्सादि मे पुत्तओ जेण एव्वं चिरायदि.

13. C. नूनम् for नियतम्; रक्षा for यात्रा; om. नितान्तदूरम्. B_1 B_2 नितान्तं दूरम्.

14. B. add मुहुत्तंपि before अज्जउत्तं, and read ण (B_1 om.) पेक्खन्ती.

15. C. आज्ञापय for आज्ञापयतु महाराजः. B. विज्ञा (B_2 ज्ञ) पनीयम्.

16. B. चेतसि for हृदयेन. C. किमु दक्षिणेतर, B_1 किमु दक्षिणेक्षण. C. इहायं करिष्यते भानुः for मम पुत्रकः कुशली. B. add अथ च सूर्याङ्गयोगो(B_2 गे)नाशुभम् before ऊर्ध्वम्. B_2 °दायी and रक्तच्छदाः. B. भुवः for रुचः. B_2 B_3 विमुञ्चन्. B_1 B_2 अमतः and B_3 अमे after एव. C. om. सविस्मयम्.

Digitized by Google

17 जीमू०। अये कथं लग्नसरसमांसश्चूडामणिः। कस्य पुनरयं स्यात्।

18 वृद्धा। सविषादम्। महाराअ पुत्तअस्स विअ एदं चूडारअणं।

19 नायि०। अपवार्य। मा एव्वं भण।

20 प्रती०। महाराज मैवमविज्ञाय विकलो भूः। अत्र हि ताक्ष्र्येण भक्ष्यमाणानां नागाधिपानामनेकशो मस्तकमुखोत्खाताः पतन्त्येते शिरोमणयः।

21 जीमू०। देवि सोपपत्तिकमभिहितं सुनन्देन। कदाचिदेवमपि स्यात्।

22 वृद्धा। सुणन्द गच्छ। कदावि एत्तिआए वेलाए ससुरघरं एव्व आअदो भविस्सदि मे पुत्तो। ता गच्छ। जाणिअ लहु संपादेहि।

23 प्रती०। यदाज्ञापयति देवी। इति निष्क्रान्तः।

24 जीमू०। देवि अपि नाम नागचूडामणिरयं स्यात्।

ततः प्रविशति रक्तवस्त्रसंवृतः शङ्खचूडः।

25 शङ्ख०। सास्रम्। कष्टं भोः कष्टम्। मुषितोऽस्मि दैवेन।

---

18 महाराज पुत्रस्यैवैतच्चूडारत्नम्।

19 मैवं भण।

22 सुनन्द गच्छ। कदापीयत्या वेलया श्वशुरगृहमेवागतो भविष्यति मे पुत्रः। तद्गच्छ। ज्ञात्वा लघु संपादय।

---

17. B. सरसमांसकेशचूडामणिः for कथम् &c. and भविष्यति for स्यात्.

18. C. add मे after विअ.

19. C. om. अपवार्य.

20. B. add एव after अविज्ञाय. B_3 विज्ञाय. C. अनेके for अनेकशः. B. एव for एते; शिखा for शिरस्.

21. B. add एतत् (B_3 तत्) after अभिहितम्. C. om. सुनन्देन.

22. C. आव for गच्छ। कदापि. B_3 समुहरं. B. तदो गच्छ तुमं for ता गच्छ.

24. C. om. नाम and अयम्; read संवीतः for संवृतः.

25. C. om. कष्टं...दैवेन; read

Digitized by Google

गोकर्णमर्णवतटे त्वरितं प्रणम्य
प्राप्तोऽस्मि तां खलु भुजङ्गमवध्यभूमिम्।
आदाय तं नखमुखक्षतवक्षसं च
विद्याधरं गगनमुत्पतितो गरुत्मान् ॥ ६ ॥

हा निष्कारणबान्धव। हा परमकारुणिक। हा परदुःखदुःखित। हा विपद्वारिनिधिपतितजनोद्धरणपोत। हा परोपकारतृणीकृतदत्तदेह। क्व नु खलु गतोऽसि। प्रयच्छ मे प्रतिवचनम्। आत्मानमुद्दिश्य। हा हतोऽस्मि मन्दभाग्यः। हा शङ्खचूडहतक किं त्वया कृतम्।

नाहित्राणात्कीर्तिरेकाहमाप्ता
नापि श्लाघ्या स्वाभिमोऽनुष्ठिताज्ञा।
दत्वात्मानं रक्षितोऽन्येन शोच्यो
हा धिक्कष्टं तेन वा वञ्चितोऽस्मि ॥ ७ ॥

तन्नाहमेवंविधः क्षणमपि जीवन्नुपहास्यमात्मानं करोमि। यावदेनां रुधिरधारामनुगन्तुं प्रयतिष्ये। भूमौ दत्तदृष्टिः परिक्रामति।

आदावुत्पीडपृथ्वीं प्रविरलपतितस्थूलबिन्दुं ततोऽग्रे
ग्रावस्थापातशीर्णप्रसृततनुकणां कीटकीर्णां स्थलीषु।

---

thus:—शृण्वन्। हा महासत्त्व। हा परमकारुणिक। हा निष्कारणैक बान्धव। हा परदुःखदुःखित। क्व गतोऽसि। प्रयच्छ मे प्रतिवचनम् for हा निष्कारण...मन्दभाग्यः. B_3 वारिधि; om. दत्त. B_1 B_3 प्रियवचनम्; and आः for हा. C. अहित्राणा for अहित्राणात्. B. अन्या (B_4 अन्या) मया for एकाहम्. B_3 आघा. C. वञ्चितो वञ्चितोऽस्मि for तेन &c. B_1 B_3 तत्त्व for तत्; add इति after करोमि. B. add ततः before यावत्. C. एतदनुगमनं प्रति यतिष्ये for एनां...प्रयतिष्ये; and परिक्रामन् भूमौ दत्तदृष्टिः B_1 उत्पाट्य. B_3 उत्पाट्य, B_3 उत्पीड्य; °पतितम् for °पतितः; & अग्रे for अग्रे. B. ग्रावणि. C. आयाम for आपात. B. शीर्णाम् for शीर्ण°; कीटकीर्णस्थलीषु. C. B_3

दुर्लक्ष्यां धातुपीठे वनतरुशिखरे स्त्याननीलस्वरूपा-
मेनां तार्क्ष्यं दिदृक्षुर्निपुणमनुसरन् रक्तधारां व्रजामि ॥ ८ ॥

26 वृद्धा। ससाध्वसम्। महाराअ एसो कोवि रुदिअवअणो इदो एव्व तुरिदं आअच्छन्तो हिअअं मे आकुलीकरेदि। ता जाणीअदु दाव को एसोत्ति।

27 जीमू०। यथाह देवी।

28 शङ्ख०। हा त्रिभुवनैकचूडामणे। हा परार्थदत्तदेह। क्व मया द्रष्टव्योऽसि। इति क्रन्दति। मुषितोऽस्मि भो मुषितोऽस्मि।

29 जीमू०। आकर्ण्य सहर्षम्। देवि मुञ्च विषादम्। अस्यायं चूडामणिर्नूनं मांसलोभात्केनापि पक्षिणा समुत्क्षिप्य नीयमानोऽस्मिन्प्रदेशे पतितः।

30 वृद्धा। सहर्षं मलयवतीमालिंग्य। अविहवे धीरा होहि। ण क्खु ईदिसी आकिदी एरिसं वेहव्वदुक्खं अणुहोदि।

31 नायि०। सहर्षम्। अम्ब तुम्हाणं आसिसां पसाएण। इति पादयोः पतति।

---

26 महाराज एष कोऽपि रुदितवदन इत एव त्वरितमागच्छन् हृदयं मे आकुलीकरोति। तज्ज्ञायतां तावत्क एष इति।

30 अविधवे धीरा भव। न खल्वीदृश्याकृतिरीदृशं वैधव्यदुःखमनुभवति।

31 अम्ब युष्माकमाशिषां प्रसादेन।

दुर्लक्ष्याम्. C. धातुनिभे; घन for वन. B. गह्वरे शान्तरूपाम् for स्त्याननीलस्वरूपाम्.

26. C. ससोअं विअ अरुणवअणो for कोवि रुदिअवअणो. B. आअच्छदि for आअच्छन्तो.

28. C. om. this speech and connect 29 with 27. B_2 adds एक after परार्थ; om. भोः.

29. C. add विहस्य after सहर्षम्. C. शोकम् for विषादम्. B. read another नूनम् before अस्य. C. मरतकादुत्खायानीयमानोऽस्यां भूमौ पपात for समुत्क्षिप्य &c.

30. C. सपरितोषम् for सहर्षम्. B. add पुण्णाहीए after अविहवे; om. क्खु. B_2 विहव for वेहव्व.

31. B. अज्ज (B, अज्जी) तुम्ह आसिसाए. C. om. इति.

Digitized by Google

32 जीमू०। शङ्खचूडमुपसृत्य । वत्स किं तव चूडामणिरपहृतः ।

33 शङ्ख०। आर्य न ममैव त्रिभुवनस्यापि ।

34 जीमू०। कथमिव ।

35 शङ्ख०। दुःखातिभाराद्बाष्पोपरुद्धकण्ठो न शक्नोमि कथयितुम् ।

36 जीमू०।

आवेदय ममात्मीयं पुत्र दुःखं सुदुःसहम् ।
मयि संक्रान्तमेतत्ते येन सद्यं भविष्यति ॥ ९ ॥

37 शङ्ख०। श्रूयताम् । शङ्खचूडो नाम नागः खल्वहम् । वैनतेयस्याहारार्थमवसरप्राप्तो वासुकिना प्रेषितः । किं वा विस्तरेण । कदाचिदियं रुधिरधारापद्धतिः पांशुभिरवकीर्यमाणा दुर्लक्ष्यतामुपयास्यति । अतः संक्षेपतः कथयामि ।

विद्याधरेण केनापि करुणाविष्टचेतसा ।
मम संरक्षिताः प्राणा दत्वात्मानं गरुत्मते ॥ १० ॥

38 जीमू०। कोऽन्य एवं परहितव्यसनी । वत्स ननु स्फुटमेवोच्यतां जीमूतवाहनेनेति । हा हतोऽस्मि मन्दभाग्यः ।

39 वृद्धा०। हा पुत्तअ किं तुए एदं किदं ।

---

39 हा पुत्रक किं त्वयैतत्कृतम् ।

---

32. C. om. this and the following speech.

34. C. add वत्स before कथम्.

35. B. °भार° for °अतिभाराद्बाष्प°; add स्फुटम् before शक्नोमि.

36. B. begin with वत्स; इदम् for मम. C. संक्रान्तमस्ति हृदये for मयि संक्रान्तमेतत्ते.

37. B. श्रूयतामिदम्। शङ्खचूडनामा खल्वहं नागः for श्रूयताम् ...अहम्. C. आहारार्थं वासुकिना वैनतेयाय प्रेषितः for वैनतेयस्य...प्रेषितः. B. बहुना for वा. C. उपयाति; and तत् for अतः. B. °मय for °आविष्ट.

38. B. read thus:—जी०। जीमूतवाहनादन्यः क एवं परहितव्यसनी स्यात्। ननु स्फुटमेवोच्यताम् । शङ्ख०। पुत्रेण ते जीमूतवाहनेनेति । जी०। हा हतोऽस्मि मन्दभाग्यः (B, हा पुत्र किं कृतम् for हा हतोऽस्मि).

39. C. कदं for किं. B, इदं for एदं. B. om. किदं.

Digitized by Google

40 नायि०। हा कहं सच्चीभूदं मे दुण्णिमित्तं।
सर्वे मोहं गच्छन्ति।

41 शङ्ख०। साम्प्रतम्। नूनमेतौ पितरौ तस्य महासत्त्वस्य। कथमप्रियवादिना मयैतामवस्थां नीतौ। अथवा विषधरवदनाद्विषमन्तरेण किमन्यन्निष्क्रामति। अहो प्राणप्रदस्य सुसदृशं प्रत्युपकृतं जीमूतवाहनस्य शङ्खचूडेन। तत्किमधुनैवात्मानं व्यापादयामि। अथ वा समाश्वासयामि तावदेतौ। तात समाश्वसिहि। अम्बा समाश्वसितु। उभौ समाश्वसितः।

42 वृद्धा०। मलयवतीमुद्दिश्य। वच्छे उट्ठेहि। मा रोअ। अम्हेवि किं जीमूदवाहणेण विणा जीवमह। ता समस्सस दाव।

43 नायि०। समाश्वस्य। अज्जउत्त कहिं दाणिं मए तुमं पेक्खिदव्वो।

44 जीमू०। हा वत्स गुरुजनशुश्रूषाभिज्ञ।
चूडामणिं चरणयोर्मम पातयता त्वया।
लोकान्तरगतेनापि नोज्झितो विनयक्रमः ॥ ११ ॥
चूडामणिं गृहीत्वा। हा वत्स कथमेतावन्मात्रदर्शनः संवृत्तोऽसि। हृदये दत्वा। अहह।

---

40 हा कथं सत्यीभूतं मे दुर्निमित्तम्।
42 वत्से उत्तिष्ठ। मा रुदिहि। वयमपि किं जीमूतवाहनेन विना जीवामः। तत्समाश्वसिहि तावत्।
43 आर्यपुत्र कदानीं मया त्वं प्रेक्षितव्यः।

---

40. B_3 सच्च° for सची°. C. एदम् दुण्णिमित्तं for मे दुण्णिमित्तं.

41. B_1 स्वगतम् for साम्प्रतम्. B. अथ before नूनम्. B_2 B_3 add तस्यौ before तस्य. B. अप्रियावेदनात् (B_3 अप्रियनिवेदनात्) for अप्रियवादिना; एवेत्यम् for इमाम्. C. विषाद्भूते विषधरस्य मुखात्किमन्यन्निःसरति for विषधर°...निष्क्रामति. B_3 जीवित° for जीमूत.° B. आर्ये समाश्वसिहि २.

42. C. om. मलयवतीमुद्दिश्य and वि.

43. C. om. दाणिं. B. दाणिं मुए मुहं (B_3 om. this) पेक्खिदव्वं for मए तुमं पेक्खितव्यः.

44. C. °चरणशुश्रूषाविधिज्ञ for

भक्त्यातिदूरमवनाववनम्रमौलेः
शश्वत्तव प्रणमतश्चरणौ मदीयौ ।
चूडामणिर्निकषणैर्मसृणोऽप्ययं हि
गाढं विघट्टयति मे हृदयं कथं नु ॥ १२ ॥

45 वृद्धा । हा पुत्र जीमूतवाहन जस्स दे गुरुअणसुस्सूसं वज्जिअ अण्णं सुहं ण रोअदि सो कहं विअ दाणिं पिदरं छड्डिअ सग्गसुहं अणुभविदुं गदोसि ।

46 जीमू० । साधु । देवि वयं किं जीमूतवाहनेन विनापि जीवामो येनैवं प्रलपसि ।

47 नायि० । पादयोर्निपत्य कृताञ्जलिः । ताद देहि मे अय्यउत्तचिण्हं चूडारअणं । जेण एदं हिअए करिअ जलणप्पवेसेण अवणेमि अत्तणो संदावदुक्खं ।

48 जीमू० । अयि पतिव्रते किमेवमाकुलासि । ननु सर्वेषामेवास्माकमयं निश्चयः ।

49 वृद्धा० । महाराअ ता किं पडिवालिअदि ।

---

45 हा पुत्र जीमूतवाहन यस्मै ते गुरुजनशुश्रूषां वर्जयित्वान्यत्सुखं न रोचते स कथमिवेदानीं पितरमुज्झित्वा स्वर्गसुखमनुभवितुं गतोऽसि ।

47 तात देहि मे आर्यपुत्रचिह्नं चूडारत्नम् । येनैतद् हृदये कृत्वा ज्वलनप्रवेशेनापनयाम्यात्मनः सैतापदुःखम् ।

49 महाराज । तत्किं प्रतिपाल्यते ।

°जनशुश्रूषाभिज्ञ ; अवनामित for अवनाववं°. B. विकषणैः. C. अर्हिलः for अयं हि & विदारयति मे हृदये for विघट्टयति मे हृदयम. B_3 नु for नु.

45. C. कहिं for कहं. B. सुहं वि- C. B_3 om. विअ after कहं.

46. C. place वयम् after जीवामः & om. अपि.

47. C. ता for ताद. B. भट्टाडत्त- स्स अङ्गाहरणचिह्नं for अय्यउत्तचिण्हं. C. हिअभस्स for अत्तणो.

48. C. om. अयि. B. om. एवम्. C. आकुलवसि.

49. C. add अम्हेहिं after किं.

Digitized by Google

50 जीमू०। देवि न किंचित्। किन्त्वाहिताग्नेर्नान्येनाग्निना संस्कारो विहितः। अतोऽग्निहोत्रशरणादग्नीनादायात्मानमुदीपयामः।

51 शङ्ख०। स्वगतम्। कष्टं ममैकस्य कृते सकलमेवेदं विद्याधरकुलमुच्छिन्नम्। तदेवं तावत्। प्रकाशम्। तात न खल्वेवमनिश्चित्यैव युक्तं साहसमनुष्ठातुम्। विचित्राणि विधिविलसितानि। कदाचिन्नायं नाग इति विज्ञाय जीवन्तमेव जीमूतवाहनं परित्यजेन्नागशत्रुः। तदनयैव रुधिरधारया वैनतेयमनुसरामः।

52 वृद्धा। सव्वधा देवदाणं पसाएण जीवन्तं एव्व पुत्तअं पेक्खिस्सं।

53 नायि०। स्वगतम्। दुल्लहं क्खु एदं मह मन्दभाअधेआए।

54 जीमू०। अवितथैषा भारती भवतु। तथापि साग्नीनामेवास्माकं युक्तमनुसर्तुम्। तत्तामनुसरतु भवान्। वयमप्यग्निशरणादग्नीनादाय त्वरितमेवागच्छामः। इति पत्नीवधूसमेतो निष्क्रान्तः।

---

52 सर्वथा देवतानां प्रसादेन जीवन्तमेव पुत्रकं प्रेक्षिष्ये।
53 दुर्लभं खल्वेतन्मम मन्दभागधेयायाः।

---

50. B_3 देवि किंचित्र, B_2 किंचिन्न, & C. न खलु देवि किंचित्. B_1B_2 ततः for अतः. B. आगच्छ येन (B_3 आगच्छेस्तेन, B_2 आगच्छेत्यत्र) आत्मानं व्यापादयामः (B_1 °मि).

51. B. पापस्यार्थे for कृते; om. एवेदम्; read विच्छिन्नम्; एतद् for एवम्. C. om. एवम्; add इदमीदृशम् after युक्तम्; सविचाराणि हि दैवविलसितानि. B_1 B_2 विधेः for विधि°. C. om. जीवन्तमेव जीमूतवाहनम्; read दिशा for रुधिरधारया; add तावद् at the end.

52. C. जीवन्तस्य पुत्तअस्स मुहं दंसेम.

53. C. मन्दभग्गाए.

54. C. वत्स अवितथैषा तव &c. B_3 अनुव्रजनम्. C. om. ताम्. B_3 संततामनुसरतु भवान् धाराम्. C. अग्निम्: अनुगच्छामः. B_1 B_2 add जीमूतकेतुः after निष्क्रान्तः.

Digitized by Google

55 शङ्ख०। तथावद्गरुडमनुसरामि । परिक्रम्याग्रतो निर्वर्ण्य च ।

कुर्वाणो रुधिरार्द्रचञ्चुकषणैर्द्रोणीरिवाद्रेः शिलाः
प्रष्टोपान्तवनान्तरः स्वनयनज्योतिःशिखाश्रेणिभिः ।
सज्जद्वज्रकठोरघोरनखरप्रान्तावगाढावनिः
शृङ्गाग्रे मलयस्य पन्नगरिपुर्दूरादयं दृश्यते ॥ १३ ॥

ततः प्रविशत्यासनस्थः पुरःपतितनायको गरुडः ।

56 गरु०। आत्मगतम् । जन्मनः प्रभृति भुजङ्गपतीनश्नता नेदृशमाश्चर्यं मया दृष्टपूर्वम् । यदयं महात्मा न केवलं न व्यथते प्रत्युत प्रहृष्ट इव किमपि दृश्यते । तथा हि

ग्लानिर्नाधिकपीयमानरुधिरस्याप्यास्ति धैर्योदधेः
मांसोत्कर्षणजा रुजोऽपि वहतः प्रीत्या प्रसन्नं मुखम् ।
गात्रं यन्न विलुप्तमेष पुलकस्तत्र स्फुटो लक्ष्यते
दृष्टिर्मय्युपकारिणीव निपतत्यस्यापकारिण्यपि ॥१४॥

तत्कुतूहलमेव मे जनितमस्यानया धैर्यवृत्या । तद्भवतु न भक्षयाम्येनम् । पृच्छामि तावत्कोऽयमिति ।

57 नाग०।

शिराप्रुखैः स्यन्दत एव रक्त-
मद्यापि देहे मम मांसमस्ति ।
तृप्तिं न पश्यामि तवापि देहे
किं भक्षणात्त्वं विरतो गरुत्मन् ॥ १५ ॥

---

55. B_1 B_3 ततोऽहमेक एव, B_2 ततोऽहमपि for तथावद्. C. om. परिक्रम्य & च. B. अये after च. C. नवाः for शिलाः. B. क्लिष्ट for दृष्ट. C. उत्खात for उपान्त ; मज्जत् for सज्जत्. B_1 कुठार for कठोर. C. असौ. B. पातित°.

56. C. om. आत्मगतम्. B. आजन्मनः(B_3 °तः)प्रभृति; ममाग्रतो न चेदृमीदृशमाश्चर्यं मया (B_3 मया) अश्चर्यम् for अग्रता ...मया ; महासत्त्वो न केवलं विपद्यते (B_3 न पीड्यते) for महात्मा...व्यथते. C. om. प्रत्युत. B_1 B_3 दृष्टः. B. add सविस्मयम् after दृश्यते. C. उदधेः for उदधेः ; कर्तन for कर्षण; एक for एषः ; दृश्यते ; om. मे & तत् B. जानामि for पृच्छामि ; add उपरतो भक्षणात्पुरस्तिष्ठति after इति.

57. C. च ते महात्मन् for तवापि देहे.

Digitized by Google

58 मरु०। स्वगतम्। आश्चर्यमाश्चर्यम्। कथमयमस्यामप्यवस्थायामूर्जितमेवाभिधत्ते। प्रकाशम्। अहो महासत्त्व

आवर्जितं मया चश्वा हृदयात्त्व शोणितम्
धैर्येणानेन च हतं त्वया हृदयमेव मे ॥ १६ ॥

तत्कस्त्वमिति श्रोतुमिच्छामि।

59 नाय०। एवं क्षुधाकुलो भवान्न श्रवणयोग्यः। तत्कुरुष्व तावन्मांसशोणितेन तृप्तिम्।

60 शङ्ख०। ससंभ्रममुपसृत्य। तार्क्ष्य तार्क्ष्य न खलु साहसमनुष्ठातव्यम्। नायं नागः। परिव्रजैनम्। मां भक्षय। अहं तवाहारार्थं वासुकिना प्रेषितः। उरो ददाति।

61 नाय०। शङ्खचूडं पश्यन्नात्मगतम्। कथं विफलीकृतो मे मनोरथः शङ्खचूडेनागच्छता।

62 गरु०। उभौ निरूप्य। द्वयोरपि भवतोर्वध्यचिह्नम्। कतरः खलु नाग इति नावगच्छामि।

63 शङ्ख०। कथमस्थान एव भवतो भ्रान्तिः।

आस्तां स्वस्तिकलक्ष्म वक्षसि तनौ नालोक्यते कञ्चुको
जिह्वे जल्पत एव मे न गणिते नाम त्वया द्वे अपि।
तिस्रस्तीव्रविषाग्निधूमपटलव्याजिह्मरत्नत्विषो
नैता दुःसहशोकफूत्कृतमरुत्स्फीताः फणाः पश्यसि ॥ १७ ॥

---

58. B. अहो महाश्चर्यम्. C. om. अयम्; add एवम् after अवस्थाम्; om. एव & अहो महासत्त्व; read अनेन धैर्येण पुनस्त्वया हतमिवाद्य मे. B_1 B_2 om. तत्कः &c.; B_3 तत्कथय को भवान्.

59. C. एवं क्षुधातस्तो न श्रावणयोग्यस्त्वम्. B_2 क्षुधातुरः. B. प्रथमं तावत्, शोणितमांसेन. B_1 B_2 add एव before तृप्तिम्.

60. C. सहसोपसृत्य। तार्क्ष्य न खलु न खलु साहसमनुष्ठेयम्. B_1 B_2 add अयम् before & B_2 अद्य after अहम्. C. प्रेषितोऽस्मि वासुकिना. B. इत्यभिधाय पुरो वपुर्दधाति.

61. C. om. आत्मगतम्; read कष्टं विफलीभूतः. B. om. मे.

62. B. चिह्नमास्ति. C. कः for कतरः.

63. C. स्थान एव भ्रान्तिः for कथम् &c. B. आस्ते (B_2 आस्तत्?) स्वस्तिकलक्षणं न कथितं किं कञ्चुको वक्षसो (B_2 कञ्चुकं मक्षणो). C. सीत्कृतमरुत्स्फीताः for फूत्कृतमरुत्स्फीताः.

Digitized by Google

64 करु०। शङ्खचूडस्य फणान्वीक्ष्य नायकं पश्यन् । तस्करः खलवयं वया व्यापादितः ।

65 शङ्ख०। विद्याधरवंशतिलको जीमूतवाहनः । कथमकारुणिकेन स्वयेदमनुष्ठितम् ।

66 गरु०। स्वगतम् । अये अयमसौ विद्याधरकुमारो जीमूतवाहनः ।

मेरौ मन्दरकन्दरासु हिमवत्सानौ महेन्द्राचले
कैलासस्य शिलातलेषु मलयप्राग्भारभागेष्वपि ।
दिक्कुञ्जेषु च तेषु तेषु बहुशो यस्य श्रुतं तन्मया
लोकालोकविचारि चारणगणैरुद्गीयमानं यशः ॥ १८ ॥

सर्वथा महत्यंहःपङ्के निमग्नोऽस्मि ।

67 नाय०। भो फणिपते किमेवमुद्विग्नोऽसि ।

68 शङ्ख०। किमस्थानमिदमावेगस्य ।

स्वशरीरेण शरीरं तार्क्ष्यात्परिरक्षतो मदीयमिदम् ।
युक्तं नेतुं भवतः पातालतलादपि तलं माम् ॥ १९ ॥

69 गरु०। अये कथं करुणार्द्रचेतसानेन महात्मना मद्भासगोचरपतितस्यास्य फणिनः प्राणान् रक्षितुं स्वदेह आहारा-

---

64. C. उभौ निरूप्य शङ्खचूडस्य फणां दृष्ट्वा. B. om. तत्. C. om. अयम्.

65. B. भो भो अयम् before विद्याधर°; परमकारुणिकेनापि स्वयामुं प्रति निष्ठुरमिदमाचरितमज्ञानात् for कथम् &c.

66. B. om. स्वगतम्. C. add कथमनुष्ठितम् after स्वगतम्; om. अये and असौ; add अस्य हि after जीमूतवाहनः. B. अथ महीं° for मल°. B_1 B_2 उद्देशेष्वपि for दिक्कुञ्जेषु च. B_2 उद्देशेष्वनिलेषु तेषु. B_1 B_2 यशसा: for यशः.

67. B_1 B_2 ना०। फणिपते शङ्खचूड किमेवमाविग्नोऽसि। किमु स्थानमिदमागमनस्य। स्वशरीरेण &c. for 67 and 68.

68. C. स्वशरीरमिदं दत्त्वा तार्क्ष्यात्परिरक्षितं मदीयमिदम् for the first line. B_1 B_2 नेतुं युक्तम्. B_1 तत् for माम्. B_2 om. सर्वथा &c. of 66 and 67 and 68.

69. C. om. कथम्; read अस्मद् for मद्. B. मासगोचरस्य फणिपतेः for मास°...फणिनः; परिरक्षितुम्; स्वयमेवात्माहारे (B_2 अहो for अहारे) for स्वदेह आहारार्थम्; अपकृत्वम्

Digitized by Google

र्थमुपनीतः। तन्महदकृत्यमेतन्मया कृतम्। किं बहुना। बोधिसत्त्व एवायं मया व्यापादितः। तदस्य महापातकस्याग्निप्रवेशादृते नान्यत्प्रायश्चित्तं पश्यामि। तत्कु खलु वह्निमासादयामि। अग्रतो विलोक्य। अये अमी केचिद्गृहीताग्नय इत एवाभिवर्तन्ते। तद्यावदेतान् प्रतिपालयामि।

70 शङ्ख०। कुमार पितरौ ते प्राप्तौ।

71 नाय०। ससंभ्रमम्। शङ्खचूड समुपविश्योत्तरीयेणाच्छादितशरीरं कृत्वा धारय माम्। अन्यथा कदाचिदीदृगवस्थं मामालोक्य पितरौ सहसा जीवितं जह्यातां।

72 शङ्ख०। पार्श्वपतितमुत्तरीयमादाय तथा करोति।

ततः प्रविशति पत्नीवधूसमेतो जीमूतकेतुः।

73 जीमू०। सास्रम्। हा पुत्र जीमूतवाहन।

आत्मीयः पर इत्ययं खलु कुतः सत्यं कृपायां क्रमः
किं रक्ष्या बहवः किमेक इति ते जाता न चिन्ता कथम्।
तार्क्ष्यात् त्रातुमहिं स्वजीवितपरित्यागं त्वया कुर्वता
येनात्मा पितरौ वधूरिति हतं निःशेषमेतत्कुलम् ॥ २० ॥

74 वृद्धा। मलयवतीमुद्दिश्य। जादे विरम मुहुत्तअं। तुह अविरदा-

74 जाते विरम मुहूर्तम्। तवाविरताश्रुधाराभिर्विज्वालो भवत्यग्निः। तन्मा रुदिहि।

C. om. मया; read तस्य महतः पापस्य for तदस्य महापापस्य. B. तत् (B$_2$ यत्) कुत्र खलु. C. दिशः पश्यन् for अग्रतो विलोक्य. B$_2$ °अग्नय इव. C. आगच्छन्ति. B. तत्प्रतिपालयामि तावत्.

70. B. om. ते.

71. B. अनेनोत्तरीयेण शरीरमाच्छादितं कृत्वा समीपासीनो मां धारय for उत्तरीयेण...माम्; यथा for अन्यथा. C. क्वचिदीदृशं सहसैव मां दृष्ट्वाम्बा जीवितं जह्यात् for कदाचित् &c.

72. C. गृहीत्वा. B. °स्तुषासमेतः.

73. B. add हा गुरुचरणशुश्रूषाभिज्ञ after जीमूतवाहन. B. सत्य (B$_2$ B$_3$ सत्यं) कृपायाः; रक्षानि बहून् किमेकम्; चिन्ता न जाता; इमम् (B$_2$ इदम्) for अहिम्; अभिहतम् (B$_3$ °हितम्) for इति हतम्. B$_2$ अस्मत् for एतत्.

74. B. आलिङ्ग्य for आहरव.

Digitized by Google

सुधाराहिं विज्जालो होदि अग्गी। ता मा रुद।

सर्वे परिक्रामन्ति।

75 जीमू०। हा पुत्त जीमूतवाहन।

76 गरु०। श्रुत्वा। हा जीमूतवाहनेति ब्रवीति। तच्चक्तमयमस्य पिता। तत्कृतमेतदीयेनाग्निना। न शक्नोम्यस्य पुत्रघातलज्जया मुखं दर्शयितुम्। अथवा किमग्निहेतोः पर्याकुलोऽस्मि। तटस्थ एवास्मि जलनिधेः। तद्यावदिदानीम्

ज्वालाभङ्गैस्त्रिलोकीग्रसनरसलसत्कालजिह्वाग्रकल्पैः
सर्पद्भिः सप्तसप्तेः पदमिव कवलीकर्तुमीशैः समुद्रे।
स्वैरेवोत्पातवातप्रसरपटुतरैर्धुक्षिते पक्षवातै-
रस्मिन्कल्पावसानज्वलनभयकरे वाडवाग्नौ पतामि ॥ २१ ॥

इत्युत्थातुमिच्छति।

77 नाय०। भो पतगराज अलमनेनाध्यवसायेन। नायं प्रतीकारोऽस्य पाप्मनः।

78 गरु०। जानुभ्यां स्थित्वा कृताञ्जलिः। भो महात्मन् कस्तर्हि कथ्यताम्।

79 नाय०। प्रतिपालय क्षणम्। पितरौ मे प्राप्तौ। यावदेतौ प्रणमामि।

C. अविरलनिवडन्तबाह (C$_2$ C$_3$ बाल) बिन्दुहिं अहिहत्थीअदि अअं अग्गी · om. ता मा रुद. B$_3$ हविअदि for होदि.

75. B. om. this speech.

76. B. add अथे कोऽयम् before हा; तस्मुच्यक्तमनेन पित्रा भवितव्यम्; ततः for तत्. C. किमेतदीयेनाग्निनात्मानमुद्दीपयामि for कृतं...अग्निना. B. लज्जावा पुत्रघातीति for पुत्रघातलज्जया; समीपस्थ एव जलधिः। तावदिदानीम् for तटस्थः &c. C. त्रिलोक°. B. सप्तसप्तेः (B$_3$ °प्तेः) तृणमिव कवलीकर्तुमीशे समुद्रान्. B$_1$ B$_3$ पक्षावातैः. B. om. इति.

77. C. पक्षिराजः. B. पापस्य.

78. B. जानुभ्यां निपत्य शिरोनिहिताञ्जलिः; om. भोः.

79. B$_1$ B$_3$ om. क्षणम्. C. क्षणमेकम्.

Digitized by Google

80 गरु०। एवं क्रियताम्।

81 जीमू०। दृष्ट्वा सहर्षम्। देवि दिष्ट्या वर्धसे। अयं वत्सो जीमूतवाहनो न केवलं म्रियते प्रत्युत कृताञ्जलिना गरुडेन शिष्येणेव पर्युपास्यमानस्तिष्ठति।

82 वृद्धा। सहर्षम्। महाराअ किदत्थम्हि। अक्खदसरीरस्स पुत्तअस्स मुहं पेक्खिस्सं।

83 नायि०। जं सच्चकं अज्जउत्तं पेक्खन्तीएवि छित्तिकरिअ ण पच्चाअअदि मे हिअअं।

84 जीमू०। उपसृत्य। वत्स एह्योहि। परिष्वजस्व माम्।

85 नाय०। उत्थातुमिच्छन् पतितोत्तरीयो मूर्च्छति।

86 शङ्ख०। कुमार समाश्वसिहि समाश्वसिहि।

87 जीमू०। हा वत्स कथं मां दृष्ट्वापि परित्यज्य गतोऽसि।

88 वृद्धा। हा पुत्तअ कहं वाआमेत्तकेणवि तुए ण संभाविदम्हि।

89 नायि०। हा अज्जउत्त कहं गुरुअणोवि तुए उवेक्खिदो।

---

82 महाराज कृतार्थास्मि। अक्षतशरीरस्य पुत्रस्य मुखं प्रेक्षिष्ये।

83 यत्सत्यमार्यपुत्रं प्रेक्षमाणाया अपि झटितिकृत्वा न प्रत्येति मे हृदयम्।

88 हा पुत्रक कथं वाङ्मात्रेणापि त्वया न संभावितास्मि।

89 हा आर्यपुत्र कथं गुरुजनोऽपि त्वयोपेक्षितः।

---

81. B. जीमूतवाहनं दृष्ट्वा for the stage direction; अभिवर्धते; अयं मे; शिष्येणेव गरुडेनोपास्यमानः (B, add अपि) तिष्ठति.

82. B. सरीरस्स एव. C. om. पुत्तअस्स.

83. C. अहं अज्जउत्तं पेक्खिअ अक्षिपिभांति करिअ ण पत्तिआमि. B, छित्ति करिअ.

84. B. om. वत्स.

85. B. मूर्च्छति & इच्छति (B, add च).

87. B. om. हा. C. om. अपि; read परिष्वङ्क्ष्व in place of परिष्वजस्व. B. place कथम् before गतः.

88. B. om. तुए.

89. B. om. वि. C. हे ण पेक्खिदव्वो for तुए उवेक्खिदो.

Digitized by Google

सर्वे मोहं गच्छन्ति।

90 शङ्ख०। आः शङ्खचूडहतक परात्मरक्षितजीव कथं गर्भस्थ एव न विपन्नोऽसि। येनैवं क्षणे क्षणे मरणातिगं दुःखमनुभवसि।

91 गरु०। सर्वमिदं मम नृशंसस्यासमीक्ष्यकारितया विजृम्भितम्। तदेवं तावत्करोमि। प्रक्षाल्यां वीजयन्। भो महात्मन् समाश्वसिहि समाश्वसिहि।

92 नाग०। शङ्खचूड समाश्वासय गुरून्।

93 शङ्ख०। तात समाश्वसिहि। मातः समाश्वसिहि। समाश्वसितो जीमूतवाहनः। किं न पश्यथ युष्माकमेव समाश्वासनार्थं प्रत्युत्थितोपविष्टस्तिष्ठति।

उभौ समाश्वसितः।

94 वृद्धा। पुत्त कहं पेक्खन्ताणं एव्व अम्हाणं किदन्तहदकेण अवहरीआसि।

95 जीमू०। देवि मैवमसङ्गल्यवादिनी भव। म्रियत एवायुष्मान्। तद्वधूः समाश्वास्यताम्।

96 वृद्धा। मुखं वस्त्रेणावृत्य रुदती। पडिहदममङ्गलं। ण रोदिस्सं। मलयवतीमुद्दिश्य। जादे समस्सस समस्सस। उट्ठेहि

94 पुत्र कथं प्रेक्षमाणानामेवास्माकं कृतान्तहतकेनापहियसे।

96 प्रतिहतममङ्गलम्। न रोदिष्यामि। जाते समाश्वसिहि समाश्वसिहि। उत्तिष्ठोत्तिष्ठ। वरमियत्यां वेलायां त्वं मर्तुर्मुखं प्रेक्षस्व।

90. C. हा for आः. B_3 add हा after °हतक. C. om. परात्मरक्षितजीव. B_3 °जीविद्य (त ?) for °जीव. K. add. स्वम् before गर्भस्थः; place कथम् after एव; मरणातिरिक्तम् for मरणातिगम्. B_3 अनुवहसि.

92. B_1 B_2 गुरू.

93. C. om. समाश्वसितः...तिष्ठति. B_3 प्रस्तुत for प्रत्युत्थित°.

94. B. हा पुत्त. B. परिपेक्खन्ताणं (B_3 °पेक्खिदाणं).

95. B. देवि मामैवमाश्वसिहि for this speech.

96. B. प्रा (B_3 वि)वृण्वती रुदती (B_3 B_2 रोदिति) एव. B_3 B_2 एव्वं before पडिहदं. C. om. मलयवतीमुद्दिश्य; read मलअवदि समस्सस for जादे समस्सस २; add वच्छे before उट्ठेहि. B. एदं एत्तिअं (B_3 वरं इदअं) वेलं दे भत्तुणो मुहं विट्ठुं for वरं &c.

Digitized by Google

उट्ठेहि । वरं एत्तिअं वेलं तुमं भत्तुणो मुहं पेक्ख ।

97 नायि०। समाश्वस्य । हा अज्जउत्त ।

98 वृद्धा। मलयवत्या मुखं पाणिना परिमृज्य । सोभाग्गवदी होहि । पडिहदं विग्घं ।

99 जीमू०। सास्रमात्मगतम् ।

विलुप्तशेषाङ्गतया प्रयातान्
निराश्रयत्वादिवकण्ठदेशम् ।
प्राणांस्त्यजन्तं तनयं निरीक्ष्य
कथं न पापः शतधा व्रजामि ॥ २२ ॥

100 नायि०। अदिदुक्खभाइणी क्खु अहं । जा ईदिसंवि अज्जउत्तं पेक्खन्ती अज्जवि जीविदं ण परिच्चजामि ।

101 वृद्धा। नायकस्याङ्गानि स्पृशन्ती गरुडमुद्दिश्य । हा णिसंस कहं दाणिं तुए एदं आहरणाणंवि किदसोहं एव्व एदावत्थं पुत्तअस्स मे सरीरं किदं ।

---

97 हा आर्यपुत्र ।

98 सौभाग्यवती भव । प्रतिहतो विघ्नः ।

100 अतिदुःखभागिनी खल्वहम् । येदृशमप्यार्यपुत्रं प्रेक्षमाणाद्यापि जीवितं न परित्यजामि ।

101 हा नृशंस कथमिदानीं त्वयैतदाभरणानामपि कृतशोभमेवंतदवस्थं पुत्रकस्य मे शरीरं कृतम् ।

---

98. B_1 B_2 सहू, B_3 सुण्हे for सो° (see the note). C. मलयवत्या मुखं पिधाय। वच्छे मा एव्वं करेहि। पडिहदं क्खु एदं.

99. B. om. सास्रमात्मगतम्. B_1 B_2 are wanting in the first two lines & read the last two in place of them. B_3 गरुडमता निष्ठुरमानसेन चञ्चुना विभिन्नं हृदये परार्थं for the first two lines. C. तापान् शतधा प्रयामि.

100. C. add हा अज्जउत्त before अदि°. B_2 अह, B_3 अपि for अदि.° C. B_3 °कारिणी for °भाइणी. C. om. वि. B_1 B_2 पेक्खिअ, B_3 पेक्खामि for पेक्खन्ती. B_3 om. अज्जवि &c.

101. B. नायकाङ्गानि परामृशन्ती. C. om. हा; read णिस्त्वङ् for णिसंस, आरुहमाणजोव्वणसोहं तं, B_1 B_2 आहारत्तणं णेहअ सव्वं for आहरणाणंपि किदसोहं.

Digitized by Google

102 नाय०। अम्ब मा मैवम्। किमनेन कृतम्। ननु पूर्वमप्येतदीदृशमेव परमार्थतः। पश्य

मेदोऽस्थिमांसमज्जास्रक्संघातेऽस्मिंस्त्वचावृते।
शरीरे खलु का शोभा सदा बीभत्सदर्शने ॥ २३ ॥

103 गरु०। भो महात्मन् नरकानलज्वालावलीढमिवात्मानं मन्यमानो दुःखं तिष्ठामि। तदुपदिश्यतां येनाहं मुच्येयास्मादेनसः।

104 नाय०। अनुजानातु मां तातः। यावदस्य पापस्य प्रतिपक्षमुपदिशामि।

105 जीमू०। वत्स एवं क्रियताम्।

106 नाय०। वैनतेय श्रूयताम्।

107 गरु०। जानुभ्यां स्थित्वा शिरसि निहिताञ्जलिः। आज्ञापयतु भवान्।

108 नाय०। शृणु

नित्यं प्राणाभिघातात्प्रतिविरम कुरु प्राकृतस्यानुतापं
यत्नात्पुण्यप्रवाहं समुपचिनु दिशन् सर्वसत्त्वेष्वभीतिम्।
मग्नं येनात्र नैनः फलति परिणतं प्राणिहिंसासमुत्थं
दुर्गाधे वारिपूरे लवणपलमिव क्षिप्रमन्तर्हृदस्य ॥ २४ ॥

109 गरु०। यदाज्ञापयति भवान्।

---

102. B. सव्ययम् before अम्ब. B_1 B_2 परार्थतः; B_3 परमार्थः. B. °मज्जामांस°; समावृते for त्वचावृते. C. वास्ति for खलु.

103. B. om. इव; read अनुभवामि for तिष्ठामि. C. B_1 B_2 मुच्येयम्, B_3 मुञ्च्येयम्.

107. C. कृताञ्जलिः for जानुभ्याम् &c.; आज्ञापय simply. B_3 B_4 om. भवान्.

108. B. om. शृणु; read सर्वप्राणातिपातात्प्रविरम (B_3 अचिरम) नुकुरुष्वादरेणानुतापम्; विचरय दिशताम् (B_1 दिशताम्) for समुपचिनु दिशन्; नूनम् for मग्नम्; परिमितम् for परिणतम्; °आसमेतत् for °समुत्थम्. C. येनैतद् for दुर्गाधे; कणम् for पलम्. B_3 अम्भः for अन्तः.

109. C. यदाज्ञापयसि; °निज्ञापयि°

Digitized by Google

अज्ञाननिद्रया सुप्तो भवता प्रतिबोधितः ।
सर्वप्राणिवधादेष विरतोऽद्य प्रभृत्यहम् ॥ २५ ॥
संप्रति हि

क्वचिद्वीपाकारः पुलिनविपुलैर्भोगनिवहैः
कृतावर्तभ्रान्तिर्वलयितशरीरः क्वचिदपि ।
व्रजन्कूलात्कूलं क्वचिदपि च सेतुप्रतिसमः
समाजो नागानां विहरतु महोदन्वति सुखम् ॥ २६ ॥
अपि च ।

स्रस्तानापादलम्बान् घनतिमिरनिभान्केशपाशान्वहन्त्यः
सिन्दूरेणेव दिग्धैः प्रथमरविकरस्पर्शताम्रैः कपोलैः ।
अस्मिन्नायासिताङ्ग्योऽप्यवगणितरुचः कानने चन्दनानां
नित्यं गायन्तु रागादुरगयुवतयः कीर्तिमेतां तवैव ॥ २७ ॥

110 नाय०। साधु महात्मन् साधु । अनुमोदामहे वयम् । सर्वथा दृढसमाधिर्भव । शङ्खचूडं निर्दिश्य । त्वयापि स्वगृहमिदानीं गम्यताम् ।

111 शङ्ख०। निश्वस्याधोमुखस्तिष्ठति ।

112 नाय०। निश्वस्य मातरं पश्यन् । शङ्खचूड सत्वरं गच्छ । शोकाकुलां जननीं पश्य ।

उत्प्रेक्षमाणा त्वां तार्क्ष्यचञ्चुकोटिनिपातितम् ।
त्वद्दुःखदुःखिता नूनमास्ते सा जननी तव ॥ २८ ॥

तः. B. एव for एषः. B_3 om. हि. C. B_3 द्वीपाकारैः. B_1 B_2 महाशैलप्रख्यैः, B_3 स्थले वा पाताले for व्रजन्कूलात्कूलम्. C. विचरतु. B_3 om. अपि च. B. प्रस्थानात्पा (B_3 °नापा°) दलमांस्तिमिरचयनिभान्. B_3 एव for इव. B. शिरोभिः C. आयासेनालसाङ्ग्यः. B. अपरे° for अप्यव°. C. नित्यं गायन्तु. B_1 B_2 एवम् for एव.

110. C. om. वयम्. B_3 reads thus:—सर्वं । साधु...वयम् । ना० । सर्वथा &c. C. °समाधानः for °समाधिः. B. शङ्खचूड स्वगृहं गम्यतां चिराय (B_3 अचिराय) for त्वया &c.

112. B. om. निश्वस्य. B_3 om. शङ्खचूड. C. om. शङ्खचूड...पश्य. B. दुःखम् for नूनम्.

Digitized by Google

113 वृद्धा। सास्रम्। धण्णा क्खु सा जणणी जा गरुडमुहपडिदस्स अक्खदसरीरस्स एव्व पुत्तअस्स मुहं पेक्खिसदि।

114 शङ्ख०। अम्ब सत्यमेतत्। यदि कुमारः स्वस्थो भविष्यति।

115 नाय०। वेदनां नाटयन्। अहह परार्थसंपादनरसाक्षेपादेतावतीं वेलां न वेदिताः। संप्रति तु मां बाधितुमारब्धा मर्मच्छेदिन्यो वेदनाः। मरणावस्थां नाटयति।

116 जीमू०। ससंभ्रमम्। वत्स वत्स किमेवं करोषि।

117 वृद्धा। हा किं णु क्खु एवं वददि। सोरस्ताडम्। परित्ताअह परित्ताअह एसो क्खु मे पुत्तओ विवज्जइ।

118 नायि०। अज्जउत्त मं परिच्चइअ गमणं ते ण जुत्तं।

119 नाय०। अञ्जलिं कर्तुमिच्छन्। शङ्खचूड समानय मे हस्तौ।

120 शङ्ख०। तथा कुर्वन्। कष्टमनाथीकृतं जगत्।

121 नाय०। किंचिदुन्मीलिताक्षः पितरौ पश्यन्। तात अम्ब अयं मे पश्चिमः प्रणामः। यतः

---

113 धन्या खलु सा जननी या गरुडमुखपतिस्याक्षतशरीरस्यैव पुत्रस्य मुखं प्रेक्षिष्यते।

117 हा किं नु खल्वेवं वदति। परित्रायध्वं परित्रायध्वम्। एष खलु मे पुत्रको विपद्यते।

118 आर्यपुत्र मां परित्यज्य गमनं ते न युक्तम्।

---

113. B. सा क्खु पुण्णा से (B$_3$ णाग for पुण्णा से) जणणी (B$_3$ add जा) गरुडमुहपडिदंपि अक्खदसरीरं एव्व पुत्तअं पेक्खिस्सदि.

114. C. add एव after सत्यम्. B$_1$ B$_3$ स्वस्थी° for स्वस्थः.

115. C. लक्षिताः for वेदिताः. B$_3$ adds वेदनाः after वेदिताः.

117. B. हा पुत्त किं ते क्खु मणसि वहदि (B$_3$ जुत्तं जो मं ण वहीस for मणसि वहदि)। सेविददेवदाओ for हा ...वददि; om. सोरस्ताडम्; read सो for क्खु.

118. C. हा अज्जउत्त परिच्चइदुकाम विअ लक्खीआसि. B$_1$ B$_3$ लक्खीअदि for जुत्तं.

119. B. give this speech to Garuda; read जलम् for मे हस्तौ.

120. B. अनर्थीभूतम्.

121. C. अर्धोन्मीलितचक्षुः पितरं पश्यन्. B. तात अयमन्त्यः (B$_3$ अन्तिमः) प्रणामो मे (B$_3$ om. मे). C.

Digitized by Google

बाष्पाम्भूनि न वहन्ति विचेतनानि
श्रोत्रं स्फुटाक्षरपदां न शृणोति वाचम् ।
कष्टं निमीलितमिदं सहसैव चक्षु-
र्हा तात यान्ति विवशस्य ममासवोऽमी ॥ २९ ॥

अथवा किमनेन प्रलपितेन । संरक्षता पन्नगमित्यादि पठित्वा पतति ।

122 वृद्धा। हा पुत्त हा वच्छ हा गुरुजणवच्छल काहिं गदोसि देहि मे पडिवअणं । हा लोअणाणन्द हा जीमूदवाहण कहं पुणो दे दंसणं ।

123 जीमू०। हा पुत्र जीमूतवाहन हा निखिलजनवत्सल हा सर्वगुणनिधे क्वासि । देहि मे प्रतिवचनम् । हस्तमुत्क्षिप्य । कष्टं भोः कष्टम् ।

निराधारं धैर्यं कमिव शरणं यातु विनयः
क्षमः क्षान्तिं वोढुं क इह विरता दानपरता ।
हतं सत्यं सत्यं व्रजतु कृपणा क्वाद्य करुणा
जगज्जातं शून्यं त्वयि तनय लोकान्तरगते ॥ ३० ॥

---

122 हा पुत्र हा वत्स हा गुरुजनवत्सल कुत्र गतोऽसि । देहि मे प्रतिवचनम् । हा लोचनानन्द हा जीमूहतवाहन कथं पुनस्ते दर्शनम् ।

---

om. अतः ; read सचेतनत्वम् for विचेतनानि ; गिरं शृणोति for शृणोति वाचम् ; om. अथवा किमनेन प्रलपितेन. B. इति पूर्वोक्तं श्लोकं पठित्वा निमिलति.

122. B_3 adds हा सुरअण (translated by हा सुहृज्जनदन ?). B_1 ज्ञण, B_2 सुरहण (?) for गुरुअण. C. om. गदो & हा लोअणाणन्द &c.

123. C. प्रणयिजनवल्लभ for निखिलजनवत्सल. B. (B_3 adds देहि मे) वचनेनापि प्रत्युत्तरं न ददासि for देहि...°वचनम् ; हस्तौ ; किम् for कम्. C. च कृपा क्वाद्य कृपणा for कृपणा क्वाद्य करुणा.

Digitized by Google

124 नायि०। हा अज्जउत्त कहं मं परिच्चइअ गदोसि। णिग्घिणहिअए वज्जकठिणदेहे मलअवदि पाणनाधं विणा कधं अज्जावि जीवासि।

125 शङ्ख०। हा निष्कारणपरोपकारव्रत प्राणेभ्योऽपि वल्लभतरं जनं विहाय गम्यते। तदवश्यमेव भवन्तमन्वेति शङ्खचूडः।

126 गरु०। कष्टमुपरतोऽयं महात्मा। तत्किमिदानीं करोमि।

127 वृद्धा। सास्रमूर्ध्वमवलोक्य। भअवन्तो लोअवाला कहंपि अमिएण सिञ्चिअ एदं मे पुत्तअं जीवावेह।

128 गरु०। सहर्षमात्मगतम्। अये अमृतसंकीर्तनात्साधु स्मृतम्। मन्ये परिमृष्टमयशः। तद्यावत् त्रिदशपतिमभ्यर्थ्य तद्विसृष्टेनामृतवर्षेण न केवलं जीमूतवाहनं यावदेतानपि पूर्वभक्षितानस्थिशेषानुरगपतीन् प्रत्युज्जीवयामि। अथ प्रार्थितो न दास्यत्यसौ ततोऽहम्।

पक्षोत्क्षिप्ताम्बुनाथः पटुतरपतनप्रेर्यमाणैः समीरै-
र्नेत्रार्चिःप्लोषमूर्च्छाविधुरविनिपतत्सानलद्वादशार्कः।

---

124 हा आर्यपुत्र कथं मां परित्यज्य गतोऽसि। निर्घृणहृदये वज्रकठिनदेहे मलयवति प्राणनाथं विना कथमद्यापि जीवसि।

127 भगवन्तो लोकपालाः कथमप्यमृतेन सिञ्चतैनं मे पुत्रकं जीवयत।

---

124. C. om. मं; read अविणिग्घिणे मलअवदि किं तुए पेक्खिदव्वं जा एत्तिअं वेलं जीविआसि for णिग्घिण° &c.

125. C. हा कुमार कृपं प्राणेभ्योऽपि वल्लभं for हा...वल्लभतरम्. B. परिजनम् for जनम्. C. om. एव; read त्वाम् for भवन्तम्. B. अन्विष्यति; read 126 in continuation of this speech.

127. B. ण for पि.

128. B. °कीर्तनात्; स्मारितम्. C. प्रनष्टम्; om. यावत्. B. आशीविषान् for अस्थिशेषानुरगपतीन्. C. यदि न दास्यत्यसौ तदाहम् for अथ...अहम्; पक्षैः पीत्वाम्बुनाथं पटुतरजवनैः प्रेर्यमाणः समीरैः; अग्नि for अर्चिस्. B. क्षेप

चञ्चत्वा सञ्चूर्ण्य शक्राशानिधनदगदाप्रेतलोकेशदण्डा-
नाजौ निर्जित्य देवान् क्षणममृतमयीं वृष्टिमभ्युत्सृजामि ॥ ३१ ॥

तदयं गतोऽस्मि । इति साटोपं परिक्रम्य निष्क्रान्तः ।

129 जीमू०। वत्स शङ्खचूड किमद्यापि प्रतीक्ष्यते । समाहृत दारूणि पुत्रस्य मे विरचय चितां । येन वयमप्यनेनैव सह गच्छामः ।

130 वृद्धा। पुत्त लहु सज्जेहि । दुक्खं अम्हेहिं विणा भाउणो दे चिट्ठदि ।

131 शङ्ख०। सास्रम् । यदाज्ञापयन्ति गुरवः । नन्वग्रग एवाहं युष्माकम् । उत्थाय चितारचनां कृत्वा । तात अम्ब सज्जीकृतेयं चिता ।

132 जीमू०। कष्टं भोः कष्टम् ।

उष्णीषः स्फुट एष मूर्धनि विभात्यूर्णेयमन्तर्भ्रुवो-
श्चक्षुस्तामरसानुकारि हरिणा वक्षःस्थलं स्पर्धते ।
चक्राङ्कौ च करौ तथापि हि कथं हा वत्स मे दुष्कृतै
स्त्वं विद्याधरचक्रवर्तिपदवीमप्राप्य किं गच्छसि ॥ ३२ ॥

देवि किमपरं रुद्यते । तदुत्तिष्ठ चितायामारोहामः ।

सर्व उत्तिष्ठन्ति ।

---

130 पुत्र लघु सज्ज । दुःखमस्माभिर्विना भ्राता ते तिष्ठति ।

---

for द्वेष. B. शक्राशनिधनद (B, समद & B, सहित for धनद) गदा (B, गदां) वारि (B, B, शान्त) लोकेशपाशान् (see the note). C. अमृतमयं वर्षम्. B. om. इति साटोपं परिक्रम्य.

129. B. om. वत्स. C. स्थीयते; चितिम्; place एव after सह. B. वैश्वानरं साधयामः for गच्छामः.

130. C. पुत्त शङ्खचूड. B. अम्हेहिं विणा भाउणो दे दुक्खं हविस्सदि for दुक्खं &c.

131. B, om. सास्रम्. B. पुरःसर एवाहमत्र; °रचनम्; नाटयति for कृत्वा; om. अम्ब.

132. C. om. कष्टं भोः कष्टम् and the following verse. B, दुःखितैः. B. देवि किमिदमतिविलम्ब्यते । उत्तिष्ठ चितासमारोहणाय.

Digitized by Google

133 नायि०। बद्धाञ्जलिरूर्ध्वं पश्यन्ती । भअवदि गोरि तुए आणत्तं । जहा विज्जाहरचक्कवत्ती भत्ता ते भविस्सदित्ति । ता कहं मम मन्दभग्गाए कदे तुमं अलीअवअणा संव्वुत्ता ।

ततः प्रविशति संसभ्रमा गौरी ।

134 गौरी । महाराज जीमूतकेतो न खलु साहसमनुष्ठातव्यम् ।

135 जीमू०। अये कथममोघदर्शना गौरी ।

136 गौरी । मलयवतीमुद्दिश्य । वत्से कथमहमलीकवादिनी भवेयम् । नायकमुपसृत्य कमण्डलूदकेनाभ्युक्ष्य ।

निजेन जीवितेनापि जगतामुपकारिणः ।
परितुष्टास्मि ते वत्स जीव जीमूतवाहन ॥ ३३ ॥

137 नाय०। उत्तिष्ठति ।

138 जीमू०। सहर्षम् । देवि दिष्ट्या वर्धसे । प्रत्युज्जीवितो वत्सः ।

139 वृद्धा। भअवदीए गोरीए पसादेण ।

140 नाय०। गौरीं दृष्ट्वा बद्धाञ्जलिः । अये कथममोघदर्शना भगवती ।

---

133 भगवति गौरि त्वयाज्ञप्तम् । यथा विद्याधरचक्रवर्ती भर्ता ते भविष्यतीति । तत्कथं मम मन्दभाग्यायाः कृते त्वमलीकवचना संवृत्ता ।

139 भगवत्या गौर्याः प्रसादेन ।

---

133. B. read thus:—भअवं दिणअर विण्णवेमि । जहा विज्जाहरचक्कवत्ती मे भट्टा भविअ देवि गोरि (B$_3$ णो भत्तुणो भविसित्ति भणिअ देवीए गोरीए for मे···· गोरि) कथं मम मन्दभाअधेआए तुमंपि (B$_3$ om. तुमंपि) अलीअवअणा संवुत्ता; om. ससंभ्रमा. B$_3$ om. 134 & 135.

135. B. om. कथम्.

136. B. नायकं प्रत्युपसृत्य कमण्डलूदकेनाभिषिच्य.

138. B$_1$ B$_3$ मे वत्सः.

139. C. om. गोरीए.

140. B. om. अये कथम्. C. आखि-

Digitized by Google

अभिलषिताधिकवरदे प्रणिपतितजनार्तिहारिणि शरण्ये ।
चरणौ नमाम्यहं ते विद्याधरवन्दिते गौरि ॥ ३४ ॥

इति गौर्याः पादयोः पतति ।

सर्व ऊर्ध्वं पश्यन्ति ।

141 जीमू०। अये कथमनभ्रा वृष्टिः । भगवति किमेतत् ।

142 गौरी। राजन् जीमूतवाहनं प्रत्युज्जीवयितुमेतांश्चास्थिशेषानुरगपतीन् समुपजातपश्चात्तापेन पक्षिपतिना गरुडेन देवलोकादियममृतवृष्टिः पातिता । अङ्गुल्या निर्दिश्य ।

किं न पश्यति भवान् ।

संप्राप्ताखण्डदेहाः स्फुटमणिकिरणैर्भासुरैरुत्तमाङ्गै-
र्जिह्वाकोटिद्वयेन क्षितिममृतरसास्वादलोभाल्लिहन्तः ।
संपत्त्याबद्धवेगा मलयगिरिसरिद्वारिपूरा इवैते
वक्त्रैः प्रस्थानमार्गैर्विषधरपतयस्तोयराशिं विशन्ति ॥ ३५ ॥

नायकमुद्दिश्य । वत्स जीमूतवाहन न त्वं केवलं जीवितदानमात्रस्यैव योग्यः । तदयमपरस्ते प्रसादः ।

हंसांसाहतहेमपङ्कजरजःसंपर्कपङ्कोक्षितै-
रुत्पन्नैर्मम मानसादुपनतैस्तोयैर्महापावनैः ।
स्वेच्छानिर्मितरत्नकुम्भनिहितैरेषाभिषिच्य स्वयं
त्वां विद्याधरचक्रवर्तिनमहं प्रीत्या करोमि क्षणात् ॥ ३६ ॥

अपि च ।

अग्रेसरीभवतु काञ्चनचक्ररत्न-
मेष द्विपश्च धवलैर्दशनैश्चतुर्भिः ।

लवरदे. B. प्रणतिपरजन°.

141. B. अनभ्रादाकाशात् for अनभ्रा.

142. C. संप्राप्ताः शङ्खचूडम्. B. संप्राप्ताः खण्डदेहाः. C. om. केवलम्. B. हंसासेवित°; उज्झितैः for उक्षितैः; अवतरत् for उपनतैः; एव for एष. श्रवम् for क्षणात्; अग्रेसरः श्रयतु; °ध-

Digitized by Google

श्यामो हरिर्मलयवत्यपि चेयमूर्नि
रत्नानि ते समवलोकय चक्रवर्तिन् ॥ ३७ ॥

अपि च । आलोक्यन्ताममी शारदशशाङ्कधवलबालव्यजनहस्ता मणिपरीचिरचितेन्द्रचापभक्तयो भक्तिनमितपूर्वकायाः प्रणमन्ति नमन्ति च मतङ्गहतकादयो विद्याधरपतयः । तदुच्यतां किं ते प्रियमुपकरोमि ।

143 नाय०। अतः परमपि प्रियमस्ति ।

त्रातोऽयं शङ्खचूडः पतगपतिभयाद्वैनतेयो विनीत-
स्तेन प्राग्भक्षिता ये विषधरपतयो जीवितास्तेऽपि सर्वे ।
मत्प्राणाप्त्या च मुक्ता न गुरुभिरसवश्चक्रवर्तित्वमाप्तं
साक्षात्त्वं देवि दृष्टा प्रियमपरमतः किं पुनः प्रार्थ्यते यत् ॥ ३८ ॥

तथापीदमस्तु भरतवाक्यम् ।

वृष्टिं हृष्टशिखण्डिताण्डवकृतो मुञ्चन्तु कालेऽम्बुदाः
कुर्वन्तु प्रतिरूढसन्ततहरिच्छस्योत्तरीयां क्षितिम् ।
चिन्वानाः सुकृतानि वीतविपदो निर्मत्सरैर्मानसै-
र्मोदन्तां सततं च बान्धवसुहृल्लोकीप्रमोदाः प्रजाः ॥ ३९ ॥

इति निष्क्रान्ताः सर्वे ।

इति पञ्चमोऽङ्कः ।

समाप्तं चेदं नागानन्दं नाम नाटकम् ।

वलः. C. मे for ते ; निर्मल for धवल. B_1 B_2 °धवलाः. B_1 om. °भक्तयः. C. °पूर्वार्ध°.

143. B. add किमपि after अस्ति ; भुजगपति° ; प्राणास्ते for प्राणाप्त्या; C. प्रार्थ्यते. B_2 om. भरतवाक्यम्. C. °कृते for °कृतः ; घनाः for अम्बुदाः. B_1 B_2 कालाम्बुदाः. B. सोम for हरस्य. B_2 ends thus :—इति श्रीहर्षकृतौ नागानन्दनाटके जीमूतवाहनजीवनो नाम पञ्चमोऽङ्कः.

Digitized by Google

Digitized by Google

NOTES.

ACT I.

1 The deity invoked in the two benedictory stanzas of this play is the Buddha. All the other plays, on the other hand, invoke Brahmanical gods such as S'iva, or Vishnu or any persons or objects connected with them, but never a Buddhistic saint. We have elsewhere fully discussed the question if any legitimate inferences can be drawn as to the religion of the author from this fact of the invocation of the Buddha. What seems pertinent here is merely a compendious information about the life of Gautama Buddha and especially of his temptation by Mâra for a clear conception of the incidents referred to in the first two stanzas.

Gautama Buddha was born about the year 500 B. C. at Kapilavastu, now Bhuila, a town situated about half way between Basti and Ayodhya. His father was Suddhodana, the chief of the S'âkya tribes. His mother's name was Mâyâ. He was married to a prince's daughter Yas'odharâ, who in course of time gave birth to a son called Râhula. Gautama on one occasion saw four visions representing to him the misery of the world; whereon he resolved to leave his home and went to a forest to practise penance. When, after several attempts, he was about to attain Buddhahood, Mâra, the Buddhistic Satan, came forward to tempt him. At that time fiends and demons swarmed about him in the form of awful monsters. They surrounded the saint and assailed him in a thousand different ways. Missiles of all kinds were hurled against him, and poison and fire were showered over him, but they all turned to be ineffectual.

Digitized by Google

The baffled evil one now shifted his ground. He summoned his sixteen enchanting daughters and sent them to display their charms in the presence of the youthful saint. But the resolute young ascetic was not to be lured by their wiles. He remained calm and impassive, and with a stern face rebuked the maidens for their boldness, forcing them to retire discomfited and disgraced. After the temptor was thus vanquished, the light of the true knowledge dawned upon the mind of Gautama. The latter part of Gautama's life was spent chiefly in promulgating the doctrines of his faith. About forty-five years after the attainment of Buddhahood he died at Kus'inagara.

In the first stanza of the Nândî the poet alludes to the discomfiture of the celestial damsels alone, whereas in the second he describes all the means used by Mâra, Gautama's victory over them, and the congratulations of the heavenly beings.

ध्यान....रक्षति, 'taking recourse to the pretext of meditation of whom are you thinking? Opening your eyes (at least) for a moment, look at us who are tormented with the shafts of love. Though a saviour, you do not protect us.' ध्यान, 'deep and devout meditation restraining the senses and confining the mind to contemplation on the true nature of spirit'. क्षणम् can also be construed with पश्य and अनङ्गशरातुरं जनमिमम् with रक्षसि. जनमिमम्. A speaker, male or female, in the singular or plural, frequensly uses the word जन with reference to himself instead of using the first personal pronoun. Cf. जनमिममनुरक्तं विद्धि नायेति &c. M. II; न खेवायं जनो न च जीवितम्. Mâl. II; and सच्चवो। अअं जणो कस्स हत्थे समप्पिदो. S. IV. नो 'not' should be distinguished from नः Acc. or Gen. plu. of अस्मद्. Mr. Boyd translates rather incorrectly the first line thus:—'of whom dost thou think, putting on a pretence of religious abstraction, yet opening for an instant

Digitized by Google

thine eyes?' मिथ्याकरुणिकोऽसि 'you are known to be a kind person but that, it seems, is all false'. The word मिथ्या from the root मिथ् is an *ind.*, but often has the force of an adjective. सेर्ष्यम् 'jealously.' ईर्ष्यया सह यथा स्यात्तथा. मारवधू-भिः. Lalita-Vistara gives these to be the daughters of Mâra. मार, the god or demon of love, wrath, mischief and death; he is the great enemy of Buddha and his religion, and plays a conspicuous part in the Buddha legends.

बुद्ध. Buddhists believe that from time to time and after intervals of immeasurably long and distant periods men of superior intellect by persevering virtue and unceasing meditation attain perfect knowledge of universal truth, and proclaim it for the spiritual welfare of the world; but that after a period their instructions are neglected and lie dormant until revived by succeeding individuals. Numberless Buddhas have thus appeared, each undergoing the usual routine of devotion, attaining Buddhahood, and proclaiming the principles of the Faith. The last Buddha is accordingly made to preach only what his predecessors have imparted to the world; and in this respect he holds the same relation to the Buddhist scripture as Vyâsa does to the Brahmanic. The word Buddha signifies 'one possessed of wisdom', 'a follower of reason', 'a rationalist'.

जिन, 'the conqueror', is one of the several epithets applied to the chief Buddha, others being शाक्यमुनि, शाक्यसिंह, श्रमण, सिद्धार्थ, सुगत, तथागत, महावीर &c.

कामेनाकृष्य चापम्. It would have been better if the expression were आकृष्टचापेन कामेन to preserve symmetry with the following ones. Here the poet ought to have used the technical word मार of the Buddhas and not काम, a Brahmanical synonym of it, which has not got all the connotations

Digitized by Google

of the former. हतपटुपटहावल्गिभिः, 'dancing in unison with the well-sounding drums beaten (by them)'. हतपटुपटहं यथा स्यात्तथावल्गिभिः or हतपटुपटहाश्च ते आवल्गिनश्च तैः. भ्रूभङ्गोत्कम्पजृम्भास्मितललितदृशा, 'whose glances were attractive by reason of the knitting of the eyebrows, tremor, yawning, and smiling'. The celestial damsels (दिव्यनारीजन) are the daughters of Mâra. The *Siddhas* are a class of semi-divine beings supposed to be of great purity and holiness and said to be particularly characterised by the eight supernatural faculties called *Siddhis*. प्रह्वोत्तमाङ्गैः, 'with their heads bent down'; cf. किं कुर्वन्त्वथवोत्तमाङ्गरहितैरङ्गैरिव स्थीयते. Mu. VI. पुलकितवपुषा &c. Construe:—ध्यायन्योगपीठादचलित इति विस्मवात्पुलकितवपुषा वासवेन यो दृष्टः (स) मुनीन्द्रो वः पातु. ध्यायन् may be taken with दृष्टः also. The above way of construing इति with विस्मवात् no doubt involves a दूरान्वय, but there is no other better way. Here the pronoun सः is wanting. Vide the note on 9 *infra*. For the veneration of the Siddhas and the admiration of Vàsava compare ये ते तवानुयाताः (*i. e.* अनुयातारः) शक्रलोकपालाश्च। किन्नरगणाश्च सुरेन्द्राः कृताञ्जलिपुटाः प्रणते तस्मै (*i. e.* प्रणमन्ति तम्) ॥ L. V. 21. योगपीठ is the place where Gautama sat down and practised meditation as a means for the attainment of perfect spiritual illumination. मुनीन्द्रः, 'lord of the Munis' is an epithet of Gautama.

नान्द्यन्ते. The first thing to be done in a drama is the Pùrva Ranga, then reverence to the assembly, then the mention of the name of the poet &c. as also of the drama, and then the indroduction (आमुख). What the actors perform before the commencement of the matter to be represented, for the removal of the obstacles likely to happen to the stage in the course of it, is called Pûrva Ranga. It consists of a variety of elements, such as the प्रत्याहार &c., among which, however, the benediction (नान्दी) must be used as a special

Digitized by Google

means of removing the obstacles. It is thus defined :—

आशीर्वचनसंयुक्ता नित्यं यस्मात्प्रयुज्यते ।
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता ।
पदैर्युक्ता द्वादशभिरष्टाभिर्वा पदैरुत ॥

The meaning of the word पद, in the last line quoted above, is either 'an inflected word' or 'a line.' Compare Jagaddhara on Mâl. I, तत्र केचन पदं विभक्त्यन्तमास्थियत । केचित्त्विदं पद्यस्य भागमूचिरे. Thus according to the latter meaning of the word पद the नान्दी in the present case is अष्टपदा. नान्द्यन्ते, 'after the benediction.' With reference to this see Jagaddhara's commentary on Mâl. I ; and S. D. VI.

2 सूत्रधार, the stage-manager and principal actor who arranges the cast of characters and instructs them, and takes a prominent part in the Prastâvanâ, is thus defined by भरत :—नाट्यस्य यदनुष्ठानं तत्सूत्रं स्यात्सबीजकम् । रङ्गदैवतपूजाकृत्सूत्रधार उदीरितः. अलमतिविस्तरेण, 'enough of prolixity'. This expression in the mouth of the सूत्रधार occurs in many plays. The विस्तर refers to the several *angas* of the Pùrva Ranga, such as प्रस्ताहार and others. इन्द्रोत्सवे, 'at the festival held in honour of Indra'. आकार्य, 'having called,' gerund of the causal of कृ with आ. श्रीहर्षदेवस्य. See Introduction. देव, from the root दिव्, 'to shine,' was originally used in the Vedic literature as an adjective meaning 'brilliant,' 'shining,' thence it came to mean the gods who were shining ; and in cases similar to the present the word is used as an honorific term. पादपद्मोपजीविना, 'dependent on the lotus-like feet'; पादौ पद्मे इव ताभ्यामुपजीवतीति. अपूर्ववस्तुरचनालङ्कृतम् , 'adorned by the arrangement of an extraordinary plot'. अपूर्वं, अविद्यमानं पूर्वं यस्य तत्, may also be taken with रचना. वस्तु, 'the subject-matter of any poetic composition'. Cf. कालिदासग्रथितवस्तु मालविकाग्निमित्रं नाम नाटकम्. M. I ; & आधीर्नमस्क्रियावस्तुनिर्देशो वापि तन्मुखम्. S. D.

Digitized by Google

विद्याधरजातके प्रतिविबद्धम्. The meaning of this expression appears to be 'one that is based on the Jâtaka or birth-story of the Vidyâdhara.' The Jâtaka stories form a part of the Buddhistic Scriptures and are made up of several old stories, fables, and fairy tales. The orthodox Buddhists believe that the Buddha was accustomed throughout his long career to explain and comment on the events happening around him by telling of similar events that had occurred in his own previous births. After the death of the Buddha 550 of the stories thus narrated were gathered together in one collection called the Book of the 550 Jâtakas. Each one of these stories is generally named after the prominent character therein, which invariably belongs to the Buddha in one of his anterior births. Cf. चण्ड-किन्नरजातक, सुवर्णहंसजातक, व्याघ्रजातक &c. By the analogy of these names विद्याधरजातक may be explained to be a story of an anterior birth of the Buddha when he was born a Vidyâdhara. It would have been better if the reading were विद्याधरजातकप्रतिनिबद्धम्.

नागानन्दम्, नागानामानन्दोऽत्र वर्ण्यतेऽस्मिन्निति. The student, as he proceeds to read the fourth and the fifth acts, will come to know how this name is sufficiently significant. नाटकम्. A काव्य is considered to be of two sorts दृश्य and श्रव्य, of which the former is that which can be represented and is called रूपक. The divisions of the रूपक are thus enumerated :—

नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः ।
ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश ॥

Out of these the नाटक is thus described :—

नाटकं ख्यातवृत्तं स्यात्पञ्चसन्धिसमन्वितम् ।
विलासद्ऋद्धिगुणवद्दूरान्तं नानाविभूतिभिः ॥
सुखदुःखसमुद्भूतिनानारसनिरन्तरम् ।
पञ्चादिका दशपरास्तस्यामङ्काः परिकीर्तिताः ॥

Digitized by Google

प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान् ।
दिव्योऽथ दिव्यादिव्यो वा गुणवानाजको मतः ॥
एव एक भवेदङ्गी शृंगारो वीर एव वा ।
अङ्गमन्ये रसाः सर्वे कार्यलिर्वहणेऽद्भुतम् ॥
चत्वारः पञ्च वा मुख्याः कार्यव्यापृतपूरुषाः ।
गोपुच्छाग्रसमाग्रं तु बन्धनं तस्य कीर्तितम् ॥

